   a. भावेन - भाव पुं. 3’1 / भाव: [भू-भावे घञ्] 1 Being, existing, existence; नासतो विद्यते भावः Bg.2.16. -2 Becoming, occurring, taking place. -3 State, condition, state of being; लताभावेन परिणतमस्या रूपम् V.4; U.6.23; so कातरभावः, विवर्णभावः &c. -4 Manner, mode. -6 Rank, station, position, capacity; देवीभावं गमिता K. P.10; so प्रेष्यभावम्, किंकरभावम् &c. -6 (*a*) True condition or state, truth, reality; परं भावमजानन्तः Bg.7.24; इति मत्वा भजन्ते मां बुधा भावसमन्विताः 10.8. (*b*) Sincerity, devotion; त्वयि मे भावनिबन्धना रतिः R.8.52;2.26. -7 Innate property, disposition, nature, temperament; स तस्य स्वो भावः प्रकृतिनियतत्वादकृतकः U.6.14. -8 Inclination or disposition of mind, idea, thought, opinion, supposition; हृदयनिहितभावा गूढमन्त्रप्रचाराः किमपि

विगणयन्तो बुद्धिमन्तः सहन्ते **Pt.3.43; Ms.8.25;4.65;** निकृष्टोत्कृष्टयोर्भावं यास्तु गृह्णन्ति ताः स्त्रियः **Bu. Ch.4.23. -9 Feeling, emotion, sentiment;** एको भावः **Pt.3.66; Ku.6.95;** निर्विकारात्मके चित्ते भावः प्रथमविक्रिया **S. D. (In the dramatic science or in poetic compositions generally, *Bhāvas* are either** स्थायिन् **primary, or** व्यभिचारिन् **subordinate. The former are eight or nine, according as the *Rasas* are taken to be 8 or 9, each *rasa* having its own** स्थायिभाव**. The latter are thirty-three of thirty four in number, and serve to develop and strengthen the prevailing sentiment; for definition and enumeration of the several kinds, see R. G. first *ānana*, or K. P.4)**

b. समन्वितः - समन्वि (सम्+अनु+इ)-धातोः क्त-वि. समन्वित / समन्वि **2 P. 1 To follow, accompany. -2 To follow or infer as a consequence. /** समन्वित ***p. p.*** **1 Connected with, connected in natural order. -2 Followed. -3 Endowed with, possessing, full of. -4 Affected by.**

**12.** माम् - अस्मद् सर्व. **2'1**

**13.** भजन्ते - भज्-धातोः आत्मने लटि प्र. पु. बहु. / भज् भजँ सेवायाम् **(to worship, to honour, to pray, to serve)** भ्वादिः, ०१.११५३ उभयपदी, सकर्मकः, अनिट्

मच्चित्ताः मद्गतप्राणाः

**14.** मच्चित्ताः - मच्चित्त वि. अत्र पुं. **1'3** / मयि चित्तं येषां ते **or** अहं चित्तेषु येषां ते मच्चित्ताः (बहुव्रीहिः)

15. मद्गतप्राणाः - मद्गतप्राण वि. अत्र पुं. 1’3 / मां गताः प्राणाः येषां ते मद्गतप्राणाः (बहुव्रीहिः) /

a. गताः - गम्-धातोः क्त-वि. गत अत्र पुं. 1’3 /

b. प्राणाः - प्राण पुं. 1’3 /

परस्परम् बोधयन्तः

16. परस्परम् - अव्ययम् / परः परम् इति परस्परम् / शब्दकल्पद्रुमे परस्परं, त्रि, (“सर्व्वनाम्ने द्बे वाच्ये समासवच्च बहुलम् ।” वार्त्तिं असमासवद्भावे पूर्ब्बपदस्य सुपः सुर्व्वक्तव्यः । कस्कादित्वात् विसर्जनीयस्य सः ।) अन्योन्यम् । इतरेतरम् । यथा, – “वनानि तोयानि च नेत्रकल्पैः पुष्पैः सरोजैश्च निलीनभृङ्गैः । परस्परां विस्मयवन्ति लक्ष्मीमालोकयाञ्चक्रुरिवादरेण ॥” इति भट्टिः । २ । ५ ॥ / आपटेवर्याणां शब्दकोशे परस्पर ***a.*** **1 Mutual;** परस्परस्य मर्माणि ये न रक्षन्ति जन्तवः । त एव निधनं यान्ति वल्मीकोदरसर्पवत् ॥ **Pt.3.186;** परस्परां विस्मय- वन्ति लक्ष्मीमालोकयांचक्रुरिवादरेण **Bk.2.5. -2 (pl.) Like one another; Mb.12. *-pron., a.* Each other, one another (used in the sing. only; often in comp.);** परस्परस्योपरि पर्यचीयत **R.3.24;7.38;** अविज्ञातपरस्परैः अपसर्पैः **17.51;** परस्पराक्षिसादृक्ष्यम् **1.40;3.24. *Note*:-- The acc. and abl. singulars are often used adverbially in the sense of 'mutually', reciprocally', 'one another', 'by, from' or 'to one another'. 'against one another' &c.; see** परस्परं भावयन्तः श्रेयः परमवाप्स्यथ **Bg.3.11;10.9**

17. बोधयन्तः - बुध्-धातोः णिचः शतृ-वि. बोधयत् अत्र पुं. 1’3 / बुध् बुधँ अवगमने **(to know, to understand, to be awakened with knowledge, to be restored to senses, to**

think, to learn) भ्वादिः, ०१.०९९४ परस्मैपदी, सकर्मकः, सेट् (जानना, समझना) / तथा बुध् बुधिँर् बोधने (to know, to understand, to be awakened with knowledge, to be restored to senses, to think, to learn) भ्वादिः, ०१.१०१६ उभयपदी, सकर्मकः, सेट् / तथैव बुध् बुधँ अवगमने (to know, to understand) दिवादिः, ०४.००६८ आत्मनेपदी, सकर्मकः, अनिट् / आपटेवर्याणां शब्दकोशे बुध् -*Caus.* (बोधयति-ते) 1 To cause to know, make known, inform, acquaint with. -2 To teach, communicate, impart. -3 To advice, admonish; बोधयन्तं हिताहितम् Bk.8.82; मच्चिता मद्गतप्राणा बोधयन्तः परस्परम् Bg.10.9

नित्यम् च माम् कथयन्तः

18. नित्यम् - वि. अत्र नपुं. 1'1 / नित्य *a.* [नियमेन नियतं वा भवं नि-त्य-प्; cf. P.IV.2.104. Vārt.] 1 (*a.*) Continual, perpetual, constant, everlasting, eternal, uninterrupted नित्यम् *ind.* Daily, constantly, always, ever, perpetually, eternally
19. च - अव्ययम् also
20. माम् - अस्मद् सर्व. 2'1
21. कथयन्तः - कथ्-धातोः शतृ-वि. कथयत् अत्र पुं. 1'3 / कथ् 10 U. (कथयति-ते, कथित) 1 To tell, relate, narrate, communicate (usually with dat. of person); राममिष्वसनदर्शनोत्सुकं मैथिलाय कथयांबभूव सः R.11.37. -2 To declare, state, mention; अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् Bg.2.34; R.11.15. -3 To converse, talk with, hold conversation with; कथयित्वा सुमन्त्रेण सह Rām. -4 To indicate, betray, bespeak, show; V.1.6;

Māl.8.10; आकारसदृशं चेष्टितमेवास्य कथयति Ś.7. -5 To describe, relate; किं कथ्यते श्रीरुभयस्य तस्य Ku.7.78; कथाच्छलेन बालानां नीतिस्तदिह कथ्यते H. Pr.8; Pt.4.37. -6 To inform, give information about, complain against; Mk.3. -7 to denounce. -8 To suppose. -9 To praise, narrate devotedly

तुष्यन्ति च रमन्ति च

22. तुष्यन्ति - तुष्-धातोः लटि प्र. पु. बहु. / ०१.०७६८ तूष् तूषँ तुष्टौ भ्वादिः, परस्मैपदी, अकर्मकः, सेट् (to be satisfied, to be happy)
23. रमन्ति - रम्-धातोः परस्मै (आर्षप्रयोगः !) लटि प्र. पु. बहु. / ०१.०९५३ रम् रमँ क्रीडायाम् भ्वादिः, आत्मनेपदी, अकर्मकः, अनिट् (to enjoy, to rejoice, to play)

अन्वयार्थाः Overall Meaning

अहम् सर्वस्य प्रभवः (अस्मि) - I am the progenitor of everything.

मत्तः सर्वम् प्रवर्तते - All acceleration is due to me.

इति मत्वा - so regarding

बुधाः भावसमन्विताः माम् भजन्ते - the magie render devotion unto Me.

मच्चित्ताः - those who have only Me in their minds OR those whose minds are focused on Me

मद्गतप्राणाः - those, whose life-energies are in Me

परस्परम् बोधयन्तः - narrating devotedly to each other

नित्यम् च माम् कथयन्तः - always engaged in conversing about Me

तुष्यन्ति च रमन्ति च - they are happy and they rejoice

## छन्दोविश्लेषणम्

अहं सर्वस्य प्रभवो (८ अक्षराणि) "स्य प्रभ" एतेषां मात्राः २-१-२
मत्तः सर्वं प्रवर्तते (८ अक्षराणि) "प्रवर्त" एतेषां मात्राः १-२-१
इति मत्वा भजन्ते मां (८ अक्षराणि) "भजन्ते" एतेषां मात्राः १-२-२
बुधा भावसमन्विताः (८ अक्षराणि) "समन्वि" एतेषां मात्राः १-२-१
प्रथमे पादे अपवादः अन्यथा अस्मिन् (१०-८) श्लोके अनुष्टुभ्-छन्दः
मच्चित्ता मद्गतप्राणा (८ अक्षराणि) "द्गतप्रा" एतेषां मात्राः १-२-२
बोधयन्तः परस्परम् (८ अक्षराणि) "परस्प" एतेषां मात्राः १-२-१
कथयन्तः च मां नित्यम् (८ अक्षराणि) "च मां नि(त्य)" एतेषां मात्राः १-२-२
तुष्यन्ति च रमन्ति च (८ अक्षराणि) "रमन्ति" एतेषां मात्राः १-२-१
अस्मिन् (१०-९) श्लोके अनुष्टुभ्-छन्दः

## स्वाध्यायाः Notes of self-study

(१) श्रीकृष्णभगवान् **has already declared** अहं सर्वस्य प्रभवः, मत्तः सर्वं प्रवर्तते. **See** मां सर्वलोकमहेश्वरम् ज्ञात्वा शान्तिमृच्छति (५-२९) यः सर्वभूतस्थितं मां भजति (६-३१) अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा (७-६) अधियज्ञोऽहमेव (८-४) मया ततमिदं सर्वं जगदव्यक्तमूर्तिना (९-४) मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् (९-१०) (अहं ) प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् (९-१८)

(२) **The point is about having this in mind** इति मत्वा **and being His devotee** भावसमन्विताः बुधाः मां भजन्ते. **Here the word** भावसमन्विताः **is better understood as** भक्तिभावसमन्विताः.

(३) परस्परम् बोधयन्तः **is like 'birds of the same feather flock together.'**

(४) **Actually all subject words and phrases** बुधाः, भावसमन्विताः, मच्चित्ताः, मद्गतप्राणाः, परस्परम् बोधयन्तः,

**नित्यम् मां कथयन्त: are adjectival. There is no noun. One may take that the implicit noun is those जना: who merit these adjectives. Obviously, everyone of the flock merits all the adjectives. The adjectives are not to be taken as being applicable variously.**

**(५) The idea of mentioning all this seems to be, rather, needs to be taken to be inviting us to join the flock.**

**(६) Comes to mind a beautiful prayer by संत तुकाराम ⇒**

हेंचि दान देगा देवा तुझा विसर न व्हावा
गुण गाईन आवडी हेंचि माझी सर्व दुडी
न लगे मुक्ति धनसंपदा संतसंग देई सदा
तुका म्हणे गर्भवासी सुखे घालावें आम्हांसी

**Oh God, grant me just this much boon that I shall never ever forget you. May I be singing your praise, is all what I strive for. I do not desire either wealth or emancipation. Just give me company of your devotees, the gentlemen If so, you may give any number of births, as you please.**

शुभमस्तु

=========

# गीताभ्यासे १०-१० तेषां सततयुक्तानाम् + १०-११ तेषामेवानुकम्पार्थम्

==================

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
पदच्छेदैः - तेषाम् सततयुक्तानाम् भजताम् प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ १०-१०॥
पदच्छेदैः - ददामि बुद्धियोगम् तम् येन माम् उपयान्ति ते ॥ १०-॥
तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
पदच्छेदैः - तेषाम् एव अनुकम्पार्थम् अहम् अज्ञानजम् तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ १०-११॥
पदच्छेदैः - नाशयामि आत्मभावस्थः ज्ञानदीपेन भास्वता ॥ १०-११॥

## वाक्यांशशः विश्लेषणम्

| अनुक्र. | उद्देश्यविभागः | विधेयविभागः | | | | | |
|---|---|---|---|---|---|---|---|
| | कर्तृपदीयाः | कर्मपदीयाः | अन्ये सुबन्ताः | विधेयाः | अव्ययानि | कृदन्ताः | तिङन्ताः |
| 1a | | | तेषाम् | | | सततयुक्तानाम् | |
| 1b | | | (तेषाम्) | प्रीतिपूर्वकम् | | भजताम् | |
| 1c | ते | माम् | येन | | | | उपयान्ति |

**तेषाम् सततयुक्तानाम् make a सच्छष्ठी construct and hence वाक्यांशः 1a.**
**Likewise (तेषाम्) भजताम् with विधेयः प्रीतिपूर्वकम् वाक्यांशः 1b.**
**The conjunction येन in (1c) corresponds with तम् बुद्धियोगम् in (1d).**

<table>
<tr><td>1d</td><td></td><td>(तेभ्यः) तम् बुद्धियोगम्</td><td></td><td></td><td></td><td></td><td>ददामि</td></tr>
<tr><td colspan="8">ददामि is द्विकर्मक with (तेभ्यः) the व्यक्तिवाचकं कर्म and तम् बुद्धियोगम् the पदार्थवाचकं कर्म.</td></tr>
<tr><td>2</td><td>आत्मभावस्थः अहम्</td><td>(तेषाम्) अज्ञानजम् तमः</td><td>भास्वता ज्ञानदीपेन</td><td>तेषाम् अनुकम्पार्थम्</td><td>एव</td><td></td><td>नाशयामि</td></tr>
<tr><td colspan="8">तेषाम् अनुकम्पार्थम् एव is adverbial phrase of purpose by virtue of अर्थम् in अनुकम्पार्थम्.<br>Also भास्वता ज्ञानदीपेन in तृतीया instrumental case is adverbial phrase of manner.</td></tr>
</table>

## अन्वयशः शब्दाभ्यासाः

तेषाम् सततयुक्तानाम्

**01.** तेषाम् - तत् सर्व. अत्र पुं. **6'3**

**02.** सततयुक्तानाम् - सततयुक्त वि. अत्र पुं. **6'3** / सततं युक्तः इति सततयुक्तः (अव्ययीभावः)

- **a.** सततम् - अव्ययम् **always**
- **b.** युक्तः - युक्त वि. अत्र पुं. **1'1** / युज्-धातोः क्त-वि. युक्त / ०७.०००७ युज् युजिँर् योगे रुधादिः, उभयपदी, सकर्मकः, अनिट् **(to bind, to restrain, to join, to unite, to apply, to combine)**

(तेषाम्) प्रीतिपूर्वकम् भजताम्

**03.** प्रीतिपूर्वकम् - प्रीतिपूर्वक वि. अत्र नपुं. **1'1** / प्रीतिम् पूर्वकाम् कृत्वा

**04.** भजताम् - भजत् वि. अत्र पुं. **6’3** / भज्-धातोः शतृ-वि. भजत् / ०१.११५३ भज् भजँ सेवायाम् भ्वादिः, उभयपदी, सकर्मकः, अनिट् **(to worship, to honour, to pray, to serve)**

(तेभ्यः) तम् बुद्धियोगम् ददामि

**05.** (तेभ्यः) - तत् सर्व. अत्र पुं. **4’3**

**06.** तम् - तत् सर्व. अत्र पुं. **2’1**

**07.** बुद्धियोगम् - बुद्धियोग पुं. **2’1** / बुद्धेः योगः इति बुद्धियोग**:** (षष्ठी-तत्पुरुषः)

  **a.** बुद्धेः **-** बुद्धि स्त्री. **6’1 / intelligence**

  **b.** योगः **-** योग पुं. **1’1 / union**

**08.** ददामि - दा-धातोः लटि उ.पु. एक. / ०३.००१० दा डुदाञ् दाने जुहोत्यादिः, उभयपदी, सकर्मकः, अनिट् **(to give, to provide, to donate, to handover)**

येन ते माम् उपयान्ति ।

**09.** येन - यत् सर्व. अत्र पुं. **3’1**

**10.** ते - तत् सर्व. अत्र पुं **1’3**

**11.** माम् - अस्मद् सर्व. **2’1**

**12.** उपयान्ति - उपया-धातोः लटि प्र.पु. बहु. / उपया **2 P. 1 To approach, go towards, reach;** उपयामगृहीतोऽसि **Ts.1.4.15.** येन मामुपयान्तिते **Bg.10.10. so** पुरम्, गतिम्, नयनम्, पदवीम्; दुर्मन्त्रिणं कमुपयान्ति न नीतिदोषाः **H.3.110. -2 To attain to a particular state, meet with &c**

तेषाम् एव अनुकम्पार्थम्

**13.** एव - अव्ययम् **only**

**14.** अनुकम्पार्थम् - अनुकम्पार्थ नपुं. **1’1** / अनुकम्पा इति अर्थः यस्मिन् तत् अनुकम्पार्थम् / अथवा अर्थम् शब्दः चतुर्थ्यर्थः / तेन अनुकम्पार्थम् इति अनुकम्पायै

a. अनुकम्पायै - अनुकम्पा स्त्री. 4’1 / अनुकम्पा [कम्प्-अङ्]
**Compassion, commiseration, pity; with gen.;**
तेषामेवानुकम्पार्थम् **Bg.10.11**

आत्मभावस्थः अहम्

**15.** आत्मभावस्थः - आत्मभावस्थ वि. अत्र पुं. **1’1** / आत्मा एव इति भावः आत्मभावः (कर्मधारयः) / आत्मभावे स्थितः आत्मभावस्थः (सप्तमी-तत्पुरुषः)

a. आत्मा - आत्मन् पुं. **1’1** / आत्मन् **ātman *m.*** [अत्-मनिण् **Uṇ 4.152 said to be from** अन् **to breathe also]** 'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्मवर्ष्म च' इत्यमरः **1 The soul, the individual soul, the breath, the principle of life and sensation;** किमात्मना यो न जितेन्द्रियो भवेत् **H.1;** आत्मानं रथिनं विद्धि शरीरं रथमेव तु **Kaṭh.3.3. (In** आत्मा नदी संयमपुण्यतीर्था **H.4.87** आत्मन् **is compared to a river). -2 Self, oneself; in this sense mostly used reflexively for all three persons and in the singular number, masculine gender, whatever be the gender or number of the noun to which it refers;**

b. भावः - भाव पुं. **1’1 / disposition**

c. आत्मभावे - आत्मभावः **1 existence of the soul;** संयोग एषां न तु आत्मभावात् **Śvet.1.2. -2 the self proper, peculiar nature. -3 the body**

**16.** अहम् - अस्मद् सर्व. **1’1**

भास्वता ज्ञानदीपेन

**17.** भास्वता - भास्वत् वि. अत्र पुं. **3’1** / भास्+वत् / भास् ***f.*** [भास्-भावे-क्विप्] **1 Light, lustre, brightness** / भास्वत् ***a.*** **Bright, shining, luminous, resplendent**

18. ज्ञानदीपेन - ज्ञानदीप पुं. 3'1 / ज्ञानम् एव दीपः ज्ञानदीपः /

a. ज्ञानम् [ज्ञा-भावे ल्युट्] 1 **Knowing, understanding, becoming acquainted with, proficiency;** सांख्यस्य योगस्य च ज्ञानम् **Māl.1.7. -2 Knowledge, learning;** तथेन्द्रियाकुलीभावे ज्ञेयं ज्ञानेन शुध्यति **Mb.12.204.2;** बुद्धिर्ज्ञानेन शुध्यति **Ms.5.109;** ज्ञाने मौनं क्षमा शत्रौ **R.1.22. -3 Consciousness, cognizance, knowledge;** ज्ञानतोऽज्ञानतो वापि **Ms.8.288 knowingly or unknowingly, consciously or unconsciously. -4 Sacred knowledge; especially, knowledge derived from meditation on the higher truths of religion and philosophy which teaches man how to understand his own nature and how he may be reunited to the Supreme Spirit**

b. दीपः [दीप्-णिच् अच्] 1 **A lamp, light;** नृपदीपो धनस्नेहं प्रजाभ्यः संहरन्नपि । अन्तरस्थैर्गुणैः शुभ्रैर्लक्ष्यते नैव केनचित् ॥ **Pt.1.221.** न हि दीपौ परस्परस्योपकुरुतः **Ś. B.; so** ज्ञानदीपः **&c**

(तेषाम्) अज्ञानजम् तमः नाशयामि

19. अज्ञानजम् - अज्ञानज वि. अत्र नपुं. 2'1 / न ज्ञानमिति अज्ञानम् (नञ्-तत्पुरुषः) / अज्ञानात् अज्ञाने वा जायते इति अज्ञानजम् (उपपद-तत्पुरुषः)

20. तमः - तमस् नपुं. 2'1

21. नाशयामि - नश्-धातोः णिचः लटि उ.पु. एक. / नश् **I. 4. P.** (नश्यति, ननाश, अनशत्, नङ्क्ष्यति, नशिष्यति नष्ट; ***caus.*** नाशयति; ***desid.*** निनङ्क्षति, निनशिषति) **1 To be lost, to disappear, vanish, become invisible;** ध्रुवाणि तस्य नश्यन्ति

**H.1; तथा सामा न नश्यति Ms.8.247; Y.2.58; क्षणनष्टदृष्टतिमिरम् Mk.5.24. -2 To be destroyed, to perish, die, be ruined; जीवनाशं ननाश च Bk.14.31; Ms.8.166;7.40; Mu.6.8. -3 To run away, fly away, escape; नश्यन्ति वृन्दानि ददर्श कपीन्द्रः Bk.10.12; नेशुश्चित्रा निशाचराः 14.112; Ratn.2.3. -4 To be frustrated, become unsuccessful. -*Caus.* 1 To cause to disappear. -2 To destroy, remove, efface, drive away, cause to fly away.**

## अन्वयार्थः Overall Meaning

तेषाम् सततयुक्तानाम् - **for those, who are ever entwined (with Me)**

(तेषाम्) प्रीतिपूर्वकम् भजताम् - **for those, who lovingly, devotedly sing my prayers**

(तेभ्यः) तम् बुद्धियोगम् ददामि - **I bestow such intelligence**

येन ते माम् उपयान्ति - **by virtue of which they get to be in my company.**

तेषाम् एव अनुकम्पार्थम् - **Out of compassion for them**

आत्मभावस्थ: अहम् - **I get to be self-same and**

भास्वता ज्ञानदीपेन - **with shining light of knowledge**

(तेषाम्) अज्ञानजम् तमः नाशयामि - **destroy the darkness of unintelligence**

## छन्दोविश्लेषणम्

तेषां सततयुक्तानां (८ अक्षराणि) "तयुक्ता" एतेषां मात्राः १-२-२
भजतां प्रीतिपूर्वकम् (८ अक्षराणि) "तिपूर्व" एतेषां मात्राः १-२-१
ददामि बुद्धियोगं तं (८ अक्षराणि) "द्धियोगं" एतेषां मात्राः १-२-२
येन मामुपयान्ति ते (८ अक्षराणि) "पयान्ति" एतेषां मात्राः १-२-१
अस्मिन् (१०-१०) श्लोके अनुष्टुभ्-छन्दः

तेषामेवानुकम्पार्थम् (८ अक्षराणि) “नुकम्पा” एतेषां मात्राः १-२-२
अहमज्ञानजं तमः (८ अक्षराणि) “नजं त” एतेषां मात्राः १-२-१
नाशयाम्यात्मभावस्थो (८ अक्षराणि) “त्मभाव(स्थो)” एतेषां मात्राः १-२-२
ज्ञानदीपेन भास्वता (८ अक्षराणि) “न भास्व” एतेषां मात्राः १-२-१
अस्मिन् (१०-११) श्लोके अनुष्टुभ्-छन्दः

**स्वाध्यायाः Notes of self-study**

**(१) There is a linkage between the previous श्लोकद्वयम् and this श्लोकद्वयम्.**
**In the previous श्लोकद्वयम् the ensemble of adjectives बुधाः, भावसमन्विताः, मच्चित्ताः, मद्गतप्राणाः, परस्परम् बोधयन्तः, नित्यम् मां कथयन्तः describe the exalted souls.**
**In this श्लोकद्वयम् whereas they are further described as सततयुक्ताः प्रीतिपूर्वकम् भजन्तः, more importantly श्रीकृष्णभगवान् is adding what He does for them ⇒ (तेभ्यः) तम् बुद्धियोगम् ददामि I bestow such intelligence येन ते माम् उपयान्ति by virtue of which they get to be in my company.**
**तेषाम् एव अनुकम्पार्थम् Out of compassion for them आत्मभावस्थः अहम् I get to be self-same (with them) and भास्वता ज्ञानदीपेन with shining light of knowledge (तेषाम्) अज्ञानजम् तमः नाशयामि destroy the darkness of unintelligence.**
**(२) So, let us imbibe all those faculties, which make us eligible to join that flock !**

शुभमस्तु

==========

गीताभ्यासे १०-१२ परं ब्रह्म परं धाम + १०-१३ आहुस्त्वामृषयः सर्वे
==================

अर्जुन उवाच ।
परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
पदच्छेदैः - परम् ब्रह्म परम् धाम पवित्रम् परमम् भवान् ।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥ १०-१२॥
पदच्छेदैः - पुरुषम् शाश्वतम् दिव्यम् आदिदेवम् अजम् विभुम् ॥
आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ।
पदच्छेदैः - आहुः त्वाम् ऋषयः सर्वे देवर्षिः नारदः तथा ।
असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥ १०-१३॥
पदच्छेदैः - असितः देवलः व्यासः स्वयम् च एव ब्रवीषि मे ॥

वाक्यांशशः विश्लेषणम्

| अनु क्र. | उद्देश्यविभागः | विधेयविभागः | | | | | |
|---|---|---|---|---|---|---|---|
| | कर्तृपदीयाः | कर्मपदीयाः | अन्ये सुबन्ताः | विधेयाः | अव्ययानि | कृदन्ताः | तिङन्ताः |
| 1 | भवान् | | | परम् ब्रह्म<br>परम् धाम | | | (अस्ति) |
| 2 | सर्वे ऋषयः<br>देवर्षिः<br>नारदः *तथा<br>असितः<br>देवलः<br>व्यासः | त्वाम् | | परमम्<br>पवित्रम्<br>शाश्वतम्<br>दिव्यम्<br>पुरुषम्<br>आदिदेवम्<br>अजम् विभुम् | | | आहुः |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| 3 | (त्वम्) *स्वयम् | | मे | | च एव | | ब्रवीषि |

The words परमम् पवित्रम् शाश्वतम् दिव्यम् पुरुषम् आदिदेवम् अजम् विभुम् are adjectival of त्वाम्. But they fit well to be विधेयाः.

## अन्वयशः शब्दाभ्यासाः

भवान् परम् ब्रह्म परम् धाम

01. भवान् - भवत् सर्व. अत्र पुं. 1’1
02. परम् - पर वि. अत्र नपुं. 1’1
03. ब्रह्म - ब्रह्मन् नपुं. 1’1
04. धाम - धामन् नपुं. 1’1

सर्वे ऋषयः देवर्षिः नारदः तथा असितः देवलः व्यासः त्वाम् परमम् पवित्रम् शाश्वतम् दिव्यम् पुरुषम् आदिदेवम् अजम् विभुम् आहुः

05. सर्वे - सर्व सर्व. अत्र पुं. 1’3
06. ऋषयः - ऋषि वि. पुं. 1’3
07. देवर्षिः - देवर्षि वि. पुं. 1’1
08. नारदः - नारद वि. प्रायः पुं. 1’1 / नारदः [नरस्य धर्मो नारं, तत् ददाति दा-क] N. of a celebrated *Devarṣi* (deified saint or divine sage). [He is one of the ten mind-born sons of Brahmā, being supposed to have sprung from his thigh (Ms.1. 35). He is represented as a messenger from the gods to men and *vice versa* and as being very fond of promoting discords among gods and men; hence his epithet of कलिप्रियः. He is said to have been the inventor of the lute or Vīṇā. He is also the author of a code of laws which goes by his name.]
09. तथा - अव्ययम् also

**10. असितः - असित वि. अत्र पुं. 1'1 / असित *a.* 1 Unbound (Ved). -2 [न सितः शुभ्रः] Not white, black, dark-blue, dark-coloured;**

**11. देवलः - देवल वि. अत्र पुं. 1'1 / देवलः 1 An attendant upon an idol, a low Brāhmaṇa who subsists upon the offerings made to an idol; -2 A virtuous man**

**12. व्यासः - व्यास वि. अत्र पुं. 1'1 / व्यासः 1 Distribution, separation into parts. -2 Dissolution or analysis of a compound. -3 Severalty, distinction. -4 Diffusion, extension; तस्यैव व्यासमिच्छामि ज्ञातुं ते भगवन् यथा Bhāg.6.4.2. -5 Width, breadth. -6 The diameter of a circle. -7 A fault in pronunciation. -8 Arrangement, compilation. -9 An arranger, a compiler; द्वैपायनोऽस्मि व्यासानां कवीनां काव्य आत्मवान् Bhāg.11.16.28. -10 N. of a celebrated sage. [He was the son of the sage Parāśara by Satyavatī (born before her marriage with Śantanu q. v.); but he retired to the wilderness as soon as he was born, and there led the life of a hermit, practising the most rigid austerities until he was called by his mother Satyavatī to beget sons on the widows of her son Vichitravīrya. He was thus the father of Pāṇḍu and Dhṛitarāṣṭra and also of Vidura; q. q. v. v. He was at first called 'Kṛiṣṇadvaipāyana' from his dark complexion and from his having been brought forth by Satyavatī on a Dvīpa or island; but he afterwards came to be called Vyāsa or 'the *arranger,*' as he was supposed to have arranged the Vedas in their present form;**

विव्यास वेदान् यस्मात् स तस्माद् व्यास इति स्मृतः **cf. also** जातः स यमुनद्वीपे द्वैपायन इति स्मृतः । व्यस्य वेदान् समस्ताश्च व्यासतामगमद्विभुः ॥ **Bm.1.214. He is believed to be the author of the great epic, the Mahābhārata, which he is said to have composed with Gaṇapati for his scribe. The eighteen Purāṇas, as also the Brahma-sūtras and several other works are also ascribed to him. He is one of the seven** चिरजीविनः **or deathless persons**

13. त्वाम् - युष्मद् सर्व. **2'1**
14. परमम् - परम वि. अत्र पुं. **2'1**
15. पवित्रम् - पवित्र वि. अत्र पुं. **2'1** / पवित्र ***a.*** [पू-करणे इत्र] **1 Sacred, holy, sinless, sanctified (persons or things);** त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः **Ms.3.235;** पवित्रो नरः, पवित्रं स्थानम् **&c. -2 Purified by the performance of ceremonial acts (such as sacrifices &c.). -4 Purifying, removing sin**
16. शाश्वतम् - शाश्वत वि. अत्र पुं. **2'1** / शाश्वत ***a.*** **(**-ती ***f.*****)** [शश्वद् भवः अण्] **1 Eternal, perpetual, everlasting**
17. दिव्यम् - दिव्य वि. अत्र पुं. **2'1** / दिव्य ***a.*** [दिवि भवः यत्] **1 Divine, heavenly, celestial; -2 Supernatural, wonderful; -3 Brilliant, splendid. -4 Charming, beautiful**
18. पुरुषम् - पुरुष पुं. **2'1**
19. आदिदेवम् - आदिदेव पुं. **2'1** / आदौ च असौ देवः च इति आदिदेवः / अथवा देवानामादिः इति आदिदेवः / **the first or Supreme God**
20. अजम् - अज वि. अत्र पुं. **2'1** / अज ***a.*** [न जायते; जन्-ड. न. त.] **Unborn, existing from all eternity;** -अजः **1 The**

**'unborn', epithet of the Almighty Being;** न हि जातो न जायेऽहं न जनिष्ये कदाचन । क्षेत्रज्ञः सर्वभूतानां तस्मादहमजः स्मृतः ॥

21. विभुम् - विभु वि. अत्र पुं. **2'1** / विभु ***a.*** **(-**भू**, -**भ्वी ***f.*****) Mighty, powerful. -2 Eminent, supreme.**
22. आहुः - ब्रू-धातोः लटि प्र.पु. बहु. / ब्रू ब्रूञ् व्यक्तायां वाचि **(to speak, to tell, to explain)** अदादिः, ०२.००३९ उभयपदी, द्विकर्मकः, सेट्

स्वयम् च एव मे ब्रवीषि

23. स्वयम् - अव्ययम् ***ind.*** **1 Oneself, in one's own person**
24. च - अव्ययम्
25. एव - अव्ययम्
26. मे - अस्मद् सर्व. अत्र **4'1**
27. ब्रवीषि - ब्रू-धातोः परस्मै लटि म.पु. एक. / ब्रू ब्रूञ् व्यक्तायां वाचि **(to speak, to tell, to explain)** अदादिः, ०२.००३९ उभयपदी, द्विकर्मकः, सेट्

## अन्वयार्थः Overall Meaning

अर्जुन उवाच - अर्जुन **said**

- भवान् परम् ब्रह्म परम् धाम (अस्ति) **- The Supreme** ब्रह्म **is you only; you are the ultimate abode**
- सर्वे ऋषयः देवर्षिः नारदः तथा असितः देवलः व्यासः त्वाम् परमम् पवित्रम् शाश्वतम् दिव्यम् पुरुषम् आदिदेवम् अजम् विभुम् आहुः **- all sages, the godly sage** नारदः**, also the blackish godly sage** व्यासः **call you, sing of you to be the most excellent, most sacred, celestial, the primary God, the birthless one, the Supreme**
- स्वयम् च एव मे ब्रवीषि **- You have yourself also told me so.**

## छन्दोविश्लेषणम्

परं ब्रह्म परं धाम (८ अक्षराणि) “परं धा” एतेषां मात्राः १-२-२
पवित्रं परमं भवान् (८ अक्षराणि) “रमं भ” एतेषां मात्राः १-२-१
पुरुषं शाश्वतं दिव्यम् (८ अक्षराणि) “श्वतं दि(व्य)” एतेषां मात्राः १-२-२
आदिदेवमजं विभुम् (८ अक्षराणि) “मजं वि” एतेषां मात्राः १-२-१
अस्मिन् (१०-१२) श्लोके अनुष्टुभ्-छन्दः
आहुस्त्वामृषयः सर्वे (८ अक्षराणि) “षयः स(र्वे)” एतेषां मात्राः १-२-२
देवर्षिर्नारदस्तथा (८ अक्षराणि) “रदस्त” एतेषां मात्राः १-२-१
असितो देवलो व्यासः (८ अक्षराणि) “वलो व्या” एतेषां मात्राः १-२-२
स्वयं चैव ब्रवीषि मे (८ अक्षराणि) “ब्रवीषि” एतेषां मात्राः १-२-१
अस्मिन् (१०-१३) श्लोके अनुष्टुभ्-छन्दः

## स्वाध्यायाः Notes of self-study

**(१) This अर्जुन उवाच is after 73 श्लोकाः of श्रीभगवानुवाच. अर्जुनः has realized who or what श्रीकृष्णः is and has gone verbose. This श्लोकद्वयम् is like श्रीकृष्णस्तोत्रम् by अर्जुनः.**

**(२) Actually, when he says सर्वे ऋषयः, नारदः, व्यासः call you परमः पवित्रः शाश्वतः दिव्यः पुरुषः आदिदेवः अजः विभुः he has read the writings of सर्वे ऋषयः, नारदः, व्यासः. But he now relates all that writing is about श्रीकृष्णः.**

**(३) The message is that गीता be studied to realize what कृष्णतत्त्वम् is, not that श्रीकृष्णः is charioteer of अर्जुनः.**

शुभमस्तु

=========

गीताभ्यासे १०-१४ सर्वमेतदृतं मन्ये + १०-१५ स्वयमेवात्मनात्मानम्
===================

सर्वमेतदृतं मन्ये यन्मां वदसि केशव ।
पदच्छेदैः - सर्वम् एतद् ऋतम् मन्ये यत् माम् वदसि केशव ।
न हि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः ॥ १०-१४॥
पदच्छेदैः - न हि ते भगवन् व्यक्तिम् विदुः देवाः न दानवाः ॥
स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम ।
पदच्छेदैः - स्वयम् एव आत्मना आत्मानम् वेत्थ त्वम् पुरुषोत्तम ।
भूतभावन भूतेश देवदेव जगत्पते ॥ १०-१५॥
पदच्छेदैः - भूतभावन भूतेश देवदेव जगत्पते ॥

वाक्यांशशः विश्लेषणम्

| अनुक्र. | उद्देश्यविभागः | विधेयविभागः | | | | | |
|---|---|---|---|---|---|---|---|
| | कर्तृपदीयाः | कर्मपदीयाः | अन्ये सुबन्ताः | विधेयाः | अव्ययानि | कृदन्ताः | तिङन्ताः |
| | | | केशव | | | | |
| 1a | (त्वम्) | यत् माम् | | | | | वदसि |
| 1b | एतद् सर्वम् | | | ऋतम् | | (अस्ति) | |
| 1c | (अहम्) | | | | | | मन्ये |
| | | | भगवन् | | | | |
| 2 | देवाः | व्यक्तिम् | ते | | न हि | | विदुः |
| 3 | दानवाः | | | | न | | (विदुः) |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | पुरुषोत्तम<br>भूतभावन<br>भूतेश<br>देवदेव<br>जगत्पते | | | | |
| **4** | त्वम् | आत्मानम् | आत्मना | स्वयम् | एव | | वेत्थ |

| |
|---|
| केशव, भगवन्, पुरुषोत्तम भूतभावन भूतेश देवदेव जगत्पते **are all** संबोधनानि. **Conjunction** यत् **in (1a) relates with** एतद् सर्वम् **in (1b).** वाक्यांशः **(1a) is adjectival hence** गौणः **to (1b). But (1a) and (1b) together are object-phrases of** मन्ये **in (1c).** |

## अन्वयशः शब्दाभ्यासाः

केशव पुं. सम्बोधनमेक. / केशव ***a.*** [केशाः प्रशस्ताः सन्त्यस्य; केश-व **P.V.2.109] Having much, fine or luxuriant hair.** -वः **An epithet of Viṣṇu;** केशव जय जगदीश हरे **Gīt.1;** केशवं पतितं दृष्ट्वा पाण्डवा हर्षनिर्भराः **Subhās. -2 The Supreme Being**

मन्ये मन्-धातोः लटि उ.पु. एक. / मन् मनँ ज्ञाने **(to believe, to know, to understand, to consider, to think)** दिवादिः, ०४.००७३ आत्मनेपदी, सकर्मकः, अनिट्

यत् माम् वदसि

**01.** यत् सर्व. अत्र नपुं. **2'1**

**02.** माम् अस्मद् सर्व. **2'1**

**03.** वदसि वद्-धातोः लटि म.पु. एक. / वद् वदँ व्यक्तायां वाचि **(to talk, to speak, to tell, to describe, to inform, to explain to utter, to communicate)** भ्वादिः, ०१.११६४ परस्मैपदी, सकर्मकः, सेट्

एतद् सर्वम् ऋतम्

**04.** एतद् सर्व. अत्र नपुं. **1'1**

**05.** सर्वम् सर्व. अत्र नपुं. **1'1**

**06.** ऋतम् वि. अत्र नपुं. **1’1 /** ऋत ***a.*** **[**ऋ-क्त**] 1 Proper, right. -2 Honest, true;** सर्वमेतदृतं मन्ये यन्मां वदसि केशव **Bg.10.14 /**

भगवन् भगवत् पुं. सम्बोधनमेक. / भगवत् ***a.*** **1 Glorious, illustrious. -2 Revered, venerable, divine, holy (an epithet applied to gods, demigods and other holy or respectable personages)**

ते व्यक्तिम् न हि देवाः विदुः

**07.** ते युष्मद् सर्व. अत्र पुं. **6’1**

**08.** व्यक्तिम् - व्यक्ति स्त्री. **2’1**

**09.** न अव्ययम्

**10.** हि अव्ययम्

**11.** देवाः देव वि. पुं. **1’3 /** देवः **A god, deity**

**12.** विदुः विद्-धातोः लटि प्र.पु. बहु. / विद् विदँ ज्ञाने **(to understand, to learn, to know, to realize, to experience, to be sad, to meditate, to think)** अदादिः, ०२.००५९ परस्मैपदी, सकर्मकः, सेट्

न दानवाः

**13.** दानवाः दानव पुं. **1’3 /** दानवः [दनोरपत्यं अण्] **A demon, Rākṣasa**

पुरुषोत्तम भूतभावन भूतेश देवदेव जगत्पते

**14.** पुरुषोत्तम पुं. सम्बोधनमेक. / पुरुषेषु उत्तमः इति पुरुषोत्तमः (सप्तमी-तत्पुरुषः)

**a.** पुरुषः **puruṣaḥ [**पुरि देहे शेते शी-ड पृषो° **Tv.;** पुर्-अग्रगमने कुषन् **Uṇ.4.74] 1 A male being, man;** अर्थतः पुरुषो नारी या नारी सार्थतः पुमान् **Mk.3.27;**

**Ms.1.32;7.17;9.2; R.2.41. -2 Men, mankind. -3 A member or representative of a generation.**

b. पुरुषोत्तमः **1 an excellent man. -2 the highest or Supreme Being, an epithet of Viṣṇu or Kṛiṣṇa**

15. भूतभावन पुं. सम्बोधनमेक. / भूतानां भावनं येन सः भूतभावनः (बहुव्रीहिः)
    a. भूतानाम्  भूत वि. अत्र नपुं. 6’3 / भू-धातोः क्त-वि. भूत / भूतम् **Any being (human, divine or even inanimate)**
    b. भावनम्  वि. अत्र नपुं. 1’1 / भावनम्  **1 Creating, manifesting;** भावनं ब्रह्मणः स्थानम् **Bhāg.3.26.46. -2 Promoting any one's interests. -3 Conception, imagination, fancy, thought, idea**
16. भूतेश पुं. सम्बोधनमेक. / भूतानाम् ईशः इति भूतेशः (षष्ठी-तत्पुरुषः) / ईशः **commandant, supreme commandant**
17. देवदेव पुं. सम्बोधनमेक. / देवानां देवः इति देवदेवः (षष्ठी-तत्पुरुषः)
18. जगत्पते जगत्पति पुं. सम्बोधनमेक. / जगतः पतिः इति जगत्पतिः (षष्ठी-तत्पुरुषः)

त्वम् स्वयम् एव आत्मना आत्मानम् वेत्थ

19. त्वम् युष्मद् सर्व. अत्र पुं. 1’1
20. स्वयम् अव्ययम्
21. एव अव्ययम्
22. आत्मना आत्मन् **soul, self** पुं. 3’1 /
23. आत्मानम् आत्मन् पुं. 2’1
24. वेत्थ विद्-धातोः लटि म.पु. एक. / ०२.००५९ विद् विदँ ज्ञाने अदादिः, परस्मैपदी, सकर्मकः, सेट्  **(to understand, to learn,**

**to know, to realize, to experience, to be sad, to meditate, to think)**

## अन्वयार्थः Overall Meaning

केशव - **Oh you, the supreme, one with luxuriant hair**
मन्ये - **I realize**
यत् माम् वदसि - **whatever you are telling me**
एतद् सर्वम् ऋतम् - **all that is true and benevolent**
भगवन् - **Oh Lord**
ते व्यक्तिम् न हि देवाः विदुः - **The Gods do not understand you**
न दानवाः - **nor do the demons**
पुरुषोत्तम - **Oh you the supreme**
भूतभावन - **you, the creator of all creation**
भूतेश - **you the supreme commandant**
देवदेव - **you, the God of Gods**
जगत्पते - **you, the father of the universe**
त्वम् स्वयम् एव आत्मना आत्मानम् वेत्थ - **only you know yourself**

## छन्दोविश्लेषणम्

सर्वमेतदृतं मन्ये (८ अक्षराणि) "दृतं म(न्ये)" एतेषां मात्राः १-२-२
यन्मां वदसि केशव (८ अक्षराणि) "सि केश" एतेषां मात्राः १-२-१
न हि ते भगवन्व्यक्तिं (८ अक्षराणि) "गवन्व्य(क्तिं)" एतेषां मात्राः १-२-२
विदुर्देवा न दानवाः (८ अक्षराणि) "न दान" एतेषां मात्राः १-२-१
अस्मिन् (१०-१४) श्लोके अनुष्टुभ्-छन्दः
स्वयमेवात्मनात्मानं (८ अक्षराणि) "त्मनात्मा" एतेषां मात्राः १-२-२
वेत्थ त्वं पुरुषोत्तम (८ अक्षराणि) "रुषोत्त" एतेषां मात्राः १-२-१
भूतभावन भूतेश (८ अक्षराणि) "न भूते" एतेषां मात्राः १-२-२

देवदेव जगत्पते (८ अक्षराणि) “जगत्प” एतेषां मात्राः १-२-१

अस्मिन् (१०-१५) श्लोके अनुष्टुभ्-छन्दः

**स्वाध्यायाः Notes of self-study**

**(१) In संस्कृतम् there are स्तोत्राणि praises of God sung by devotees. This one is अर्जुन’s स्तोत्रम् unto श्रीकृष्णः. We may very much learn it by heart and sing.**

शुभमस्तु

==========

# गीताभ्यासे १०-१६ वक्तुमर्हस्यशेषेण + १०-१७ कथं विद्यामहं योगिन् + १०-१८ विस्तरेणात्मनो योगम्

==================

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ।
पदच्छेदैः - वक्तुम् अर्हसि अशेषेण दिव्याः हि आत्मविभूतयः ।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥ १०-१६॥
पदच्छेदैः - याभिः विभूतिभिः लोकान् इमान् त्वम् व्याप्य तिष्ठसि ॥
कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन् ।
पदच्छेदैः - कथम् विद्याम् अहम् योगिन् त्वाम् सदा परिचिन्तयन् ।
केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया ॥ १०-१७॥
पदच्छेदैः - केषु केषु च भावेषु चिन्त्यः असि भगवन् मया ॥
विस्तरेणात्मनो योगं विभूतिं च जनार्दन ।
पदच्छेदैः - विस्तरेण आत्मनः योगम् विभूतिम् च जनार्दन ।
भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम् ॥ १०-१८॥
पदच्छेदैः - भूयः कथय तृप्तिः हि शृण्वतः न अस्ति मे अमृतम् ॥

वाक्यांशशः विश्लेषणम्

| अनुक्र. | उद्देश्यविभागः | विधेयविभागः | | | | | |
|---|---|---|---|---|---|---|---|
| | कर्तृपदीयाः | कर्मपदीयाः | अन्ये सुबन्ताः | विधेयाः | अव्ययानि | कृदन्ताः | तिङन्ताः |
| **1a** | त्वम् | इमान् लोकान् | याभिः विभूतिभिः | | | व्याप्य | |
| **1b** | | | | | | | तिष्ठसि |
| **1c** | | (ताः) दिव्याः | अशेषेण | | हि | वक्तुम् | |

<table>
<tr><td></td><td rowspan="2"></td><td>आत्मविभूतयः</td><td></td><td></td><td></td><td></td><td></td></tr>
<tr><td>1d</td><td></td><td></td><td></td><td></td><td></td><td>अर्हसि</td></tr>
<tr><td colspan="8">व्याप्य in (1a) has its own कर्मपदीय phrase इमान् लोकान्.<br>व्याप्य in (1a) and तिष्ठसि in (1b) are समानकर्तृक.<br>त्वम् is common कर्तृपदीय across (1a) to (1d).<br>याभि: विभूतिभि: in (1a) is related with (ताः) दिव्या: आत्मविभूतयः in (1c).<br>वक्तुम् in (1c) has its own कर्मपदीय phrase (ताः) दिव्या: आत्मविभूतयः.<br>(1a), (1b), (1c) are together objectival to अर्हसि in (1d).</td></tr>
<tr><td></td><td></td><td></td><td>योगिन्</td><td></td><td></td><td></td><td></td></tr>
<tr><td>2a</td><td></td><td>त्वाम्</td><td></td><td></td><td>सदा</td><td>परिचिन्तयन्</td><td></td></tr>
<tr><td>2b</td><td>अहम्</td><td>(त्वाम्)</td><td></td><td></td><td>कथम्</td><td></td><td>विद्याम्</td></tr>
<tr><td colspan="8">त्वाम् in (2a) is कर्मपदीय of परिचिन्तयन्.<br>(2a) is adjectival of अहम् in (2b).<br>(त्वाम्) is implicit कर्मपदीय of विद्याम्.</td></tr>
<tr><td></td><td></td><td></td><td>भगवन्</td><td></td><td></td><td></td><td></td></tr>
<tr><td>3a</td><td></td><td></td><td></td><td>मया</td><td></td><td>चिन्त्यः</td><td></td></tr>
<tr><td>3b</td><td>(त्वम्)</td><td></td><td>केषु केषु भावेषु</td><td></td><td>च</td><td></td><td>असि</td></tr>
<tr><td colspan="8">मया चिन्त्य: (3a) is adjectival of (त्वम्) of (3b)<br>OR मया चिन्त्य: (3a) is विधेय: of असि in (3b)</td></tr>
<tr><td></td><td></td><td></td><td>जनार्दन</td><td></td><td></td><td></td><td></td></tr>
</table>

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| 4 | (त्वम्) | योगम् विभूतिम् च | आत्मनः विस्तरेण | | भूयः | | कथय |
| 5a | | | मे | अमृतम् | | शृण्वतः | |
| 5b | तृप्तिः | | (मे) | | हि | | न अस्ति |

अमृतम् in (5a) is adverbial of शृण्वतः.
मे शृण्वतः is सच्छष्ठी construct.
OR (मे) is pronominal of तृप्तिः

## अन्वयशः शब्दाभ्यासाः

त्वम् याभिः विभूतिभिः इमान् लोकान् व्याप्य तिष्ठसि

01. त्वम् - युष्मद् सर्व. 1’1
02. याभिः - यत् सर्व. अत्र स्त्री. 3’3
03. विभूतिभिः - विभूति special manifestation स्त्री. 3’3
04. इमान् - इदम् सर्व. अत्र पुं. 2’3
05. लोकान् - लोक world पुं. 2’3
06. व्याप्य - व्याप् (वि+आप्)-धातोः ल्यबन्तम् / व्याप् 5 P. to pervade
07. तिष्ठसि - स्था-धातोः लटि म.पु. एक. / स्था 1 P. to stay

(ताः) दिव्याः हि आत्मविभूतयः अशेषेण वक्तुम् अर्हसि

08. (ताः) - तत् सर्व. अत्र स्त्री. 2’3
09. दिव्याः - दिव्य divine वि. अत्र स्त्री. 2’3
10. हि - also, because, only अव्ययम्
11. आत्मविभूतयः - आत्मविभूति स्त्री. 2’3 / आत्मनः विभूतिः आत्मविभूतिः (षष्ठी-तत्पुरुषः)

12. अशेषेण - अशेष **leaving nothing, completely** वि. अत्र नपुं. **3’1**

13. वक्तुम् - वच्-धातोः तुमन्तम् / वच् **2 P. to narrate**

14. अर्हसि - अर्ह्-धातोः लटि म.पु. एक. / अर्ह् **1 P. to merit**

योगिन् **one engrossed in** योग**:** पुं. संबोधनमेक. /

त्वाम् सदा परिचिन्तयन्

15. त्वाम् - युष्मद् सर्व. **2’1**

16. सदा - **always** अव्ययम्

17. परिचिन्तयन् - परिचिन्तयत् वि. अत्र पुं. **1’1** / परिचिन्त् **10 P. musing from all angles**

अहम् (त्वाम्) कथम् विद्याम्

18. अहम् - अस्मद् सर्व. **1’1**

19. कथम् - **how** अव्ययम्

20. विद्याम् - विद्-धातोः विधिलिङ्-लकारे उ.पु. एक. / विद् **2 P. to know**

भगवन् केषु केषु च भावेषु (त्वम्) मया चिन्त्य**:** असि

21. भगवन् - भगवत् **glorious** पुं. संबोधनमेक. /

22. केषु - किम् सर्व. अत्र पुं. **7’3**

23. च - **and** अव्ययम्

24. भावेषु - भाव **perspective** पुं. **7’3**

25. मया - अस्मद् सर्व. **3’1**

26. चिन्त्य**:** - चिन्त्य**:** वि. अत्र पुं. **1’1** / चिन्त्-धातोः ण्यत्-वि. चिन्त्य / चिन्त् **to think, to meditate upon**

27. असि - अस्-धातोः लटि म.पु. एक. / अस् **2 P. to be**

जनार्दन भूयः आत्मन**:** योगम् विभूतिम् च विस्तरेण कथय

28. जनार्दन - पुं. संबोधनमेक. / जनानाम् अर्दनम् येन सः जनार्दनः (बहुव्रीहिः)

**a. जनानाम् - जन person पुं. 6’3**

**b. अर्दनम् - अर्दन killing, destruction नपुं. 1’1**

29. **भूयः - again अव्ययम्**
30. **आत्मनः - आत्मन् self पुं. 6’1**
31. **योगम् - योग enjoining, special faculty पुं. 2’1**
32. **विभूतिम् - विभूति divine aspect स्त्री. 2’1**
33. **विस्तरेण - विस्तर expanse पुं. 3’1**
34. **कथय - कथ्-धातोः लोटि म.पु. एक. / कथ् 10 P. to narrate**

हि शृण्वतः मे अमृतम् तृप्तिः न अस्ति

35. **हि - because अव्ययम्**
36. **अमृतम् - अमृत end-less वि. अत्र नपुं. 1’1**
37. **शृण्वतः - शृण्वत् वि. अत्र पुं. 6’1 / श्रु-धातोः शतृ-वि. शृण्वत् / श्रु 5 P. to listen to**
38. **मे - अस्मद् सर्व. 4’1 अथवा 6’1**
39. **तृप्तिः - तृप्ति स्त्री. 1’1 / तृप्+क्तिन् / तृप् 1,4,5,6,P. 10 U. to please, to be satisfied**
40. **न - no, not अव्ययम्**
41. **अस्ति - अस्-धातोः लटि प्र.पु. एक. / अस् 2 P. to be**

## अन्वयार्थः Overall Meaning

त्वम् याभिः विभूतिभिः इमान् लोकान् व्याप्य तिष्ठसि (ताः) दिव्याः हि आत्मविभूतयः अशेषेण वक्तुम् अर्हसि - **You merit, you should narrate all those divine manifestations be which you pervade the universe**

योगिन् त्वाम् सदा परिचिन्तयन् अहम् (त्वाम्) कथम् विद्याम् - **You, who is योगः personified, how I, who always meditates on you, may know you, may understand you,**

भगवन् केषु केषु भावेषु (त्वम्) मया चिन्त्यः असि च - **Oh you the lustrous, by which all perspectives should I be thinking of you ?**
जनार्दन भूयः आत्मनः योगम् विभूतिम् च विस्तरेण कथय - **Oh you, I pray, please narrate to me expansively about being enjoined with you and also about your special, divine manifestations**
हि अमृतम् श‍ृण्वतः मे तृप्तिः न अस्ति - **I never feel satisfied listening to you endlessly.**

छन्दोविश्लेषणम्

वक्तुमर्हस्यशेषेण (८ अक्षराणि) “स्यशेषे” एतेषां मात्राः १-२-२
दिव्या ह्यात्मविभूतयः (८ अक्षराणि) “विभूत” एतेषां मात्राः १-२-१
याभिर्विभूतिभिर्लोकान् (८ अक्षराणि) “तिभिर्लो” एतेषां मात्राः १-२-२
इमांस्त्वं व्याप्य तिष्ठसि (८ अक्षराणि) “प्य तिष्ठ” एतेषां मात्राः १-२-१
अस्मिन् (१०-१६) श्लोके अनुष्टुभ्-छन्दः
कथं विद्यामहं योगिन् (८ अक्षराणि) “महं यो” एतेषां मात्राः १-२-२
त्वां सदा परिचिन्तयन् (८ अक्षराणि) “रिचिन्त” एतेषां मात्राः १-२-१
केषु केषु च भावेषु (८ अक्षराणि) “च भावे” एतेषां मात्राः १-२-२
चिन्त्योऽसि भगवन्मया (८ अक्षराणि) “गवन्म” एतेषां मात्राः १-२-१
अस्मिन् (१०-१७) श्लोके अनुष्टुभ्-छन्दः
विस्तरेणात्मनो योगं (८ अक्षराणि) “त्मनो यो” एतेषां मात्राः १-२-२
विभूतिं च जनार्दन (८ अक्षराणि) “जनार्द” एतेषां मात्राः १-२-१
भूयः कथय तृप्तिर्हि (८ अक्षराणि) “य तृप्ति(र्हि)” एतेषां मात्राः १-२-२
श‍ृण्वतो नास्ति मेऽमृतम् (८ अक्षराणि) “स्ति मेऽमृ” एतेषां मात्राः १-२-१
अस्मिन् (१०-१८) श्लोके अनुष्टुभ्-छन्दः

## स्वाध्यायाः Notes of self-study

**(१) Title of this दशमोऽध्यायः is विभूतियोगः. The words विभूतिः and योगः occur so profusely here and across this दशमोऽध्यायः. अर्जुनः wants to know extensively about विभूतिः and योगः, so that he would understand Him thoroughly. श्रीकृष्णभगवान् certainly obliges. श्रीकृष्णभगवान् obliges us readers and students also helping us to understand Him as much comprehensively, if not thoroughly. We should be thankful to अर्जुनः for this.**

शुभमस्तु

==========

# गीताभ्यासे १०-१९ हन्त ते कथयिष्यामि + १०-२० अहमात्मा गुडाकेश + १०-२१ आदित्यानामहं विष्णुर् + १०-२२ वेदानां सामवेदोऽस्मि

==================

श्रीभगवानुवाच ।

पदच्छेदैः - श्रीभगवान् उवाच ।

हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः ।

पदच्छेदैः - हन्त ते कथयिष्यामि दिव्याः हि आत्मविभूतयः ।

प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥ १०-१९॥

पदच्छेदैः - प्राधान्यतः कुरुश्रेष्ठ न अस्ति अन्तः विस्तरस्य मे ॥

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।

पदच्छेदैः - अहम् आत्मा गुडाकेश सर्वभूत-आशयस्थितः ।

अहमादिश्च मध्यं च भूतानामन्त एव च ॥ १०-२०॥

पदच्छेदैः - अहम् आदिः च मध्यम् च भूतानाम् अन्तः एव च ॥

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् ।

पदच्छेदैः - आदित्यानाम् अहम् विष्णुः ज्योतिषाम् रविः अंशुमान् ।

मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥ १०-२१॥

पदच्छेदैः - मरीचिः मरुताम् अस्मि नक्षत्राणाम् अहम् शशी ॥

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः ।

पदच्छेदैः - वेदानाम् सामवेदः अस्मि देवानाम् अस्मि वासवः ।

इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥ १०-२२॥

पदच्छेदैः - इन्द्रियाणाम् मनः च अस्मि भूतानाम् अस्मि चेतना ॥

वाक्यांशशः विश्लेषणम्

| अनुक्र. | उद्देश्यविभागः | विधेयविभागः | | | | | |
|---|---|---|---|---|---|---|---|
| | कर्तृपदीयाः | कर्मपदीयाः | अन्ये सुबन्ताः | विधेयाः | अव्ययानि | कृदन्ताः | तिङन्ताः |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| **1** | श्रीभगवान् | | | | हन्त | | उवाच |
| **2** | | ते दिव्या: आत्मविभूतयः | प्राधान्यतः | | हि | | कथयिष्यामि |
| कथयिष्यामि **is** द्विकर्मक **with** ते **the** पुरुषवाचकं कर्म **and** दिव्या: आत्मविभूतयः पदार्थवाचकम् | | | | | | | |
| | | | कुरुश्रेष्ठ | | | | |
| **3** | अन्तः | | मे विस्तरस्य | | न | | अस्ति |
| | | | गुडाकेश | | | | |
| **4** | अहम् | | | सर्वभूताशयस्थितः आत्मा | | | (अस्मि) |
| **5** | अहम् | | भूतानाम् | आदि: च मध्यम् च अन्तः एव च | | | |
| **6** | अहम् | | आदित्यानाम् | विष्णु: | | | |
| **7** | | | ज्योतिषाम् | अंशुमान् रवि: | | | |
| **8** | | | मरुताम् | मरीचि: | | | अस्मि |
| **9** | अहम् | | नक्षत्राणाम् | शशी | | | |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| **10** | | | वेदानाम् | सामवेदः | | | अस्मि |
| **11** | | | देवानाम् | वासवः | | | अस्मि |
| **12** | | | इन्द्रियाणाम् | मनः | च | | अस्मि |
| **13** | | | भूतानाम् | चेतना | | | अस्मि |
| **In all 9 वाक्यांशाः from 5 to 13, there are pairs of words, one in षष्ठी बहु. and another विधेयः a compliment having प्रथमा एक. This pattern starts in श्लोकः #21 and continues up to श्लोकः #38. In all these, whether explicit or not, the subject word is अहम् and the verb is अस्मि.** | | | | | | | |

## अन्वयशः शब्दाभ्यासाः

श्रीभगवान् उवाच हन्त

**01.** श्रीभगवान् - श्रीभगवत् वि. अत्र पुं. **1’1** / श्रीमान् च असौ भगवान् च इति श्रीभगवान्
- **a.** श्रीमान् - श्रीमत् वि. अत्र पुं. **1’1** / श्री+मत् / **glorious, majestic**
- **b.** भगवान् - भगवत् वि. अत्र पुं. **1’1** / भग+वत् **revered**

**02.** उवाच - वच्-धातोः लिटि प्र.पु. एक. / वच् **2** प. **To say**

**03.** हन्त - उद्गारवाचकमव्ययम् **Oh, okay**

आत्मविभूतयः दिव्याः

**04.** आत्मविभूतयः - आत्मविभूति स्त्री. **1’3** / आत्मनः विभूतिः इति आत्मविभूतिः (षष्ठी-तत्पुरुषः)
- **a.** आत्मनः - आत्मन् पुं. **6’1 self**
- **b.** विभूतिः - विभूति स्त्री. **1’1 / disposition**

**05.** दिव्याः - दिव्य वि. अत्र स्त्री. **1’3 / divine**

प्राधान्यतः हि ते कथयिष्यामि

06. प्राधान्यतः - प्राधान्य नपुं. तसिल्-प्रत्ययेन 5’1 / prominence

07. हि - अव्ययम् only

08. ते - युष्मद् सर्व. 4’1

09. कथयिष्यामि - कथ्-धातोः परस्मै लटि उ.पु. एक. / कथ् 10 उ. To narrate

कुरुश्रेष्ठ मे विस्तरस्य अन्तः न अस्ति

10. कुरुश्रेष्ठ - वि. अत्र पुं. सम्बोधनमेक. / कुरुषु श्रेष्ठः इति कुरुश्रेष्ठ: (सप्तमी-तत्पुरुषः)

    a. कुरुषु - कुरु वि. अत्र पुं. 7’3 / कुरु a descendant of कुरु -lineage

    b. श्रेष्ठः - श्रेष्ठ वि. अत्र पुं. 1’1 / preeminent

11. मे - अस्मद् सर्व. 6’1

12. विस्तरस्य - विस्तर expanse पुं. 6’1

13. अन्तः - end पुं. 1’1

14. न - अव्ययम्

15. अस्ति - अस्-धातोः लटि प्र.पु. एक. / अस् 2 P. to be

गुडाकेश अहम् सर्वभूताशयस्थितः आत्मा

16. गुडाकेश - वि. अत्र पुं. सम्बोधनमेक. / गुडाकायाः ईशः गुडाकेशः (षष्ठी-तत्पुरुषः)

    a. गुडाकायाः - गुडाका स्त्री. 6’1 / sleep

    b. ईशः - ईश वि. अत्र पुं. 1’1 / master

17. अहम् - अस्मद् सर्व. 1’1

18. सर्वभूताशयस्थितः - सर्वभूताशयस्थित वि. अत्र पुं. 1’1 / सर्वेषां भूतानाम् आशये स्थितः सर्वभूताशयस्थितः /

    a. सर्वेषाम् - सर्व सर्व. अत्र नपुं. 6’3

    b. भूतानाम् - भूत creation वि. अत्र नपुं. 6’3

**c. आशये - आशय core पुं. 7'1 /**

**d. स्थितः - स्थित वि. अत्र पुं. 1'1 /**

**19. आत्मा - आत्मन् soul पुं. 1'1**

अहम् भूतानाम् आदि: च मध्यम् च अन्तः एव च

**20. आदि: - आदि beginning अत्र पुं. 1'1**

**21. च - अव्ययम् and**

**22. मध्यम् - मध्य middle वि. अत्र नपुं. 1'1**

**23. अन्तः - अन्त end पुं. 1'1**

**24. एव - अव्ययम् only, also**

अहम् आदित्यानाम् विष्णु: ज्योतिषाम् अंशुमान् रवि: मरुताम् मरीचि: अस्मि

**25. आदित्यानाम् - आदित्य वि. अत्र पुं. 6'3 / अदितेः अपत्यमादित्यः / son of अदितिः**

**26. विष्णु: - विष्णु वि. अत्र पुं. 1'1 /** विष्णुः [विष् व्यापने नुक् **Uṇ.3.39] 1 The second deity of the sacred Triad, entrusted with the preservation of the world, which duty he is represented to have duly discharged by his various incarnations; (for their descriptions see the several avatāras s. v. and also under** अवतार); **the word is thus popularly derived :-** यस्माद्विश्वमिदं सर्वं तस्य शक्त्या महात्मनः । तस्मादेवोच्यते विष्णुर्विशधातोः प्रवेशनात् ॥.

**27. ज्योतिषाम् - ज्योतिष् वि. अत्र पुं. 6'3 /** ज्योतिस् **jyotis *n.*** [द्युत्-इसुन् आदेर्दस्य जः. ज्युत्-इसुन् वा] **1 Light, lustre, brightness, flash;** ज्योतिरेकं जगाम **Ś.5.30; R.2.75; Me.5. -2 Light of Brahman, light regarded as the Supreme spirit; Bg.5.24;13.17;** अथ यदतः परो दिवो ज्योतिर्दीप्यते **Ch.**

**Up.3.13.7; U.4.18. -3 Lightning. -4 A heavenly body. -5 A heavenly body, a luminary (planet, star &c.**

28. **अंशुमान् - अंशुमत् वि. अत्र पुं. 1'1 /** अंशुः **[**अंश्-मृग° कु.**] 1 A ray, beam of light /** अंशुमत् ***a.*** **[**अंशु-अस्त्यर्थे मतुप्**] 1 Luminous, radiant**
29. **रविः - रवि पुं. 1'1 / sun**
30. **मरुताम् - मरुत् पुं. 6'3 / wind**
31. **मरीचिः - मरीचि पुं. 1'1 /** मरीचिः **(Rarely** मरीची **also)** ***m. f.*** **[**मृ-ईचि **Uṇ.4.70] 1 A ray of light**
32. **अस्मि -** अस्-धातोः लटि उ.पु. एक. **/** अस् **2 P. to be**

**अहम् नक्षत्राणाम् शशी वेदानाम् सामवेदः अस्मि**

33. **नक्षत्राणाम् - नक्षत्र नपुं. 6'3 /** नक्षत्रम् **[**न क्षरति**; cf. Uṇ.3.105 also] 1 A star in general. -2 A constellation, an asterism in the moon's path, lunar mansion**
34. **शशी - शशिन् वि. अत्र पुं. 1'1 /** शशिन् ***m.*** **[**शशोऽस्त्यस्य इनि**] 1 The moon**
35. **वेदानाम् - वेद पुं. 6'3 / वेद a book of knowledge, sacred text**
36. **सामवेदः - सामवेद पुं. 1'1 /** सामन् ***n.*** **[**सो-मनिन् **Uṇ.4.152] 1 Appeasing, calming, comforting, soothing. -2 Cenciliation, pacific measures, negotiation, (the first of the four *upāyas* or expedients to be used by a king against an enemy);** सामदण्डौ प्रशंसन्ति नित्यं राष्ट्राभिवृद्धये **Ms.7.109. -3 Conciliatory or mild means; pacific or conciliatory conduct, gentle words;** यो दुर्बलो ह्यण्वपि याच्यमानो बलीयसा यच्छति नैव साम्ना **Pt.4.26,48. -4**

**Mildness, gentleness. -5 A metrical hymn or song of praise**

देवानाम् वासवः अस्मि

37. देवानाम् - देव **God** वि. अत्र पुं. **6’3**
38. वासवः - वासव वि. अत्र पुं. **1’1 /** वासव ***a.*** **(-**वी ***f.*****)** **[**वसुरेव स्वार्थे अण् वसूनि सन्त्यस्य अण् वा**] 1 Relating to the Vasus. -2 Belonging to Indra;** पाण्डुतां वासवी दिगयासीत् **K.;** वासवीनां चमूनाम् **Me.45. -**वः **N. of Indra**

इन्द्रियाणाम् मनः च अस्मि

39. इन्द्रियाणाम् - इन्द्रिय **organ** नपुं. **6’3**
40. मनः - मनस् **mind** नपुं. **1’1**

**06.** राम**ः - राम पुं. 1'1 / राम rāma *a.* [**रम् कर्तरि घञ् ण वा**] 1 Pleasing, delighting, rejoicing, -2 Beautiful, lovely, charming. -3 Obscure; dark-coloured, black. -4 White. -**मः **1 N. of three celebrated personages; (*a*)** परशुरामः **son of** जमदग्निः **(*b*)** बलरामः **son of** वासुदेवः **and brother of** कृष्णः **q.q.v.v.; (*c*)** रामचन्द्रः **or** सीतारामः **son of** दशरथः **and** कौशल्या **and the hero of the** रामायणम् **(the word is thus derived in Purāṇas:--**राशब्दो विश्ववचनो मश्चापीश्वरवाचकः । विश्वाधीनेश्वरो यो हि तेन रामः प्रकीर्तितः ॥**) cf. also** राकारोच्चारमात्रेण मुखान्निर्याति पातकम् । पुनः प्रवेशशङ्कायां मकारोऽस्ति कपाटवत् ॥ **[When quite a boy, he with his brother was taken by** विश्वामित्रः **with the permission of** दशरथः **to his hermitage to protect his sacrifices from the demons that obstructed them.** रामः **killed them all with perfect ease, and received from the sage several miraculous missiles as a reward. He then accompanied** विश्वामित्रः **to the capital of** जनकः **where he married** सीता **having performed the wonderful feat of bending** शिव**'s bow, and then returned to** अयोध्या**.** दशरथः **seeing that** रामः **was growing fitter and fitter to rule the kingdom, resolved to install him as heir-apparent. But, on the eve of the day of coronation, his favourite wife** कैकेयी **at the instigation of her wicked nurse** मन्थरा **asked him to fulfil the two boons he had formerly promised to her, by one of which she demanded the exile of** रामः **for fourteen years and by the other the installation of her own son**

**भरत as युवराजः. The king was terribly shocked, and tried his best to dissuade her from her wicked demands, but was at last obliged to yield. The dutiful son immediately prepared to go into exile accompanied by his beautiful young wife सीता and his devoted brother लक्ष्मणः. The period of his exile was eventful, and the two brothers killed several powerful demons and at last roused the jealousy of रावणः himself. The wicked demon resolved to try रामः by carrying off his beauteous wife for whom he had conceived an ardent passion, and accomplished his purpose being assisted by मरीचः. After several fruitless inquiries as to her whereabouts, हनुमत् ascertained that she was in लङ्का and persuaded रामः to invade the island and kill the ravisher. The monkeys built a bridge across the ocean over which रामः with his numerous troops passed, conquered लङ्का, and killed रावणः along with his whole host of demons. रामः, attended by his wife and friends in battle, triumphantly returned to अयोध्या where he was crowned king by वसिष्ठः. He reigned long and righteously and was succeeded by his son कुशः. रामः is said to be the seventh incarnation of विष्णुः cf. जयदेव's - वितरसि दिक्षु रणे दिक्पतिकमनीयं दशमुखमौलिबलिं रमणीयम् । केशव धृतरघुपतिरूप जय जगदीश हरे Gīt.1.].**

झषाणाम् मकरः च अस्मि

**07.** झषाणाम् - झष वि. अत्र पुं. **6'3 /** झष **A fish in general;** झषाणां मकरश्चास्मि **Bg.10.31**

**08.** मकर: - मकर पुं. **1’1** / मकरः **[**मं विषं किरति कॄ-अच् **Tv.] 1 A kind of sea-animal, a crocodile, shark;** झषाणां मकरश्चास्मि **Bg.10.31;** मकरवक्त्र **Bh.2.4. (Makara is regarded as an emblem of Cupid; cf. comps. below).**

स्रोतसाम् जाह्नवी अस्मि

**09.** स्रोतसाम् - स्रोतस् वि. अत्र पुं. **6’3** / स्रोतस् ***n.*** **[**स्रु-तसि**] 1 (*a*) A stream, current, flow or course of water;** पुरा यत्र स्रोतः पुलिनमधुना तत्र सरिताम् **U.2.27; Ms.3.163. (*b*) A torrent, rapid stream;** नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे **R.1.78;** स्रोतसेवोह्यमानस्य प्रतीपतरणं हि तत् **V.2.5. -2 A stream, river (in general);** स्रोतसामस्मि जाह्नवी **Bg.10.31**

**10.** जाह्नवी - स्त्री. **1’1** / जाह्नवी [जह्नोः अपत्यं स्त्री अण् ङीप्] **An epithet of the river Ganges. /** जह्नुः **N. of an ancient king, son of** सुहोत्रा **who adopted the river** गङ्गा **as his daughter. [The river Ganges, when brought down from heaven by the austerities of** भगीरथः **was forced to flow over earth to follow him to the lower regions. In its course it inundated the sacrificial ground of king** जह्नुः**, who being angry drank up its waters. But the gods and sages, and particularly** भगीरथः**, appeased his anger, and he consented to discharge those waters from his ears. The river is therefore regarded as his daughter, and is styled** जाह्नवी, जह्नुतनया, -कन्या, -सुता, -नन्दिनी **&c.; cf. R.8.95.** जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम् **Me.52.** -सप्तमी **The seventh day of the bright half of** वैशाखः**]**

अर्जुन अहम् सर्गाणाम् आदिः अन्तः च मध्यम् च एव

**11.** अर्जुन - पुं. संबोधनमेक.

12. सर्गाणाम् - सर्ग पुं. 6’3 / सर्गः [सृज्-घञ्] 1 Relinquishment, abandonment. -2 Creation; आराध्य विप्रान् स्मरमादिसर्गे Bhāg.3.1.28; अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः V.1.8. -3 The creation of the world; प्रलयस्थितिसर्गाणां कारणतां गतः Ku.2.6; R.3.27; सर्गो नवविधस्तस्य प्राकृतो वैकृतस्तु यः Bhāg.3.10.13. -4 Nature, the universe; इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः Bg.5.19.

13. आदिः - आदि वि. अत्र पुं. 1’1 / आदि *a.* 1 First, primary, primitive; निदानं त्वादिकारणम् Ak. -2 Chief, first, principal, pre-eminent; oft. at the end of comp. in this sense; see below. -3 First in time existing before. -दिः 1 Beginning, commencement (opp. अन्त)

14. अन्तः - अन्त पुं. 1’1 / अन्तः *a.* [अम्-तन् Uṇ.3.86] 1 Near. -2 Last. -3 Handsome, lovely; Me.23; दन्तोज्ज्वलासु विमलोपलमेखलान्ताः Śi.4.40, (where, however, the ordinary sense of 'border' or 'skirt' may do as well, though Malli. renders अन्त by रम्य, quoting the authority of शब्दार्णव - 'मृतावविसिते रम्ये समाप्तावन्त इष्यते'). -4 Lowest, worst. -5 Youngest. -तः (*n.* in some senses) 1 (*a*) End, limit, boundary (in time or space); final limit, last or extreme point

15. मध्यम् - मध्य वि. अत्र नपुं. 1’1 / मध्य *a.* [मन्-यत् नस्य धः Tv.] 1 Middle, central, being in the middle or centre; एकं मुक्तागुणमिव भुवः स्थूल- मध्येन्द्रनीलम् Me.48; Ms.2.21. -2 Intervening, intermediate. -3 Middling, moderate, of a middling size or quality, mediocre; अग्र्यो मध्यो

जघन्यश्च तं प्रवेक्ष्याम्यशेषतः **Ms.12.30; प्रारभ्य विघ्नविहता विरमन्ति मध्याः Bh.2.27. -4 Neutral, impartial. -5 Just, right. -6 Mean (in astr.). -ध्यः, -ध्यम् 1 The middle, centre, middle or central part**

विद्यानाम् अध्यात्मविद्या

16. विद्यानाम् - विद्या स्त्री. **6'3** / विद्या [विद्-क्यप्] **1 Knowledge, learning, lore, science;** (तां) विद्यामभ्यसनेनेव प्रसादयितुमर्हसि **R.1.88;** विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम् **&c. Bh.2.20. (According to some *Vidyās* are four :--** आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शीश्वती **Kāmandaka);** चतसृष्वपि ते विवेकिनी नृप विद्यासु निरूढिमागता **Ki.2.6; to these four Manu adds a fifth** आत्मविद्या; त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम् । आन्वीक्षिकीं चात्मविद्यां वार्तारम्भांश्च लोकतः ॥ **Ms.7.43. But the usual number of *Vidyās* is stated to be fourteen, *i. e.* the four *Vedas,* the six *Aṅgas, Dharma, Mimāṁsā, Tarka* or *Nyāya* and the *Purāṇas;* see** चतुर्दशविद्या **under** चतुर्; **and N.1.4. In N.1.5 the number is spoken of as being eighteen by including Medicine, Military Art, Music and Polity;** अगाहताष्टादशतां जिगीषया।)

17. अध्यात्मविद्या - स्त्री. **1'1** / अध्यात्मविषयिका विद्या अध्यात्मविद्या (मध्यमपदलोपी तत्पुरुषः)

   a. अध्यात्मम् - अध्यात्म ***a.*** [आत्मनः संबद्धं, आत्मनि अधिकृतं वा] **Belonging to self or person; concerning an individual.** -अध्यात्मम् ***ind.*** [आत्मानमधिकृत्य] **Concerning self.** -अध्यात्मम् **The supreme spirit (manifested as the individual self) or the relation**

between the supreme and the individual soul; अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते Bg.8.3 (स्वस्यैव ब्रह्मण एवांशतया जीवस्वरूपेण भावो भवनं स एव आत्मानं देहमधिकृत्य भोक्तृ- त्वेन वर्तमानोऽध्यात्मशब्देनोच्यते Śrīdhara) 'Brahman is the supreme, the indestructible; its manifestation (as an individual self) is अध्यात्म'

प्रवदताम् वादः

18. प्रवदताम् - प्रवदत् वि. अत्र पुं. 6'3 / प्रवद्-धातोः शतृ-वि. प्रवदत् / प्रवद् 1 P. 1 To say, speak, utter. -2 To speak to, address; सुग्रीवः प्रावदन् नृपम् Bk.7.24. -3 To name, call. -4 To regard, consider. -5 To converse or talk with. -6 To proclaim, declare.
19. वादः - वाद पुं. 1'1 / वादः [वद्-घञ्] 1 Talking, speaking. -2 Speech, words, talk; वेदवादरताः पार्थ नान्यदस्तीति वादिनः Bg.2.42; -3 A statement, an assertion, allegation; अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः Bg.2.36. -4 Narration, account; शाकुन्तलादीनितिहासवादान् Māl.3.3. -5 Discussion, dispute, controversy; वादयुद्धप्रधानाश्च मध्यमा राजसी गतिः Ms.12.46; वादे वादे जायते तत्त्वबोधः Sūbhāṣ; सीमा°. -6 A reply. -7 An exposition, explanation; अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् Bg.10.32.

## अन्वयार्थाः Overall Meaning

अहम्

01. पवताम् पवनः अस्मि - among purifiers I am the wind
02. शस्त्रभृताम् रामः - among those who wield weapons, I am रामः.

**03. झषाणाम् मकर: च अस्मि - among aquatic lives, I am the alligator**

**04. स्रोतसाम् जाह्नवी अस्मि - among streams, I am the river Ganges.**

**05. अर्जुन अहम् सर्गाणाम् आदि: अन्त: च मध्यम् च एव - I am the beginning, middle and end of all creation**

**06. विद्यानाम् अध्यात्मविद्या - among learnables I am spiritual knowledge**

**07. प्रवदताम् वादः - I am the argument in all communications**

छन्दोविश्लेषणम्

पवनः पवतामस्मि (८ अक्षराणि) "वताम(स्मि)" एतेषां मात्राः १-२-२
रामः शस्त्रभृतामहम् (८ अक्षराणि) "भृताम" एतेषां मात्राः १-२-१
झषाणां मकरश्चास्मि (८ अक्षराणि) "करश्चा" एतेषां मात्राः १-२-२
स्रोतसामस्मि जाह्नवी (८ अक्षराणि) "स्मि जाह्न" एतेषां मात्राः १-२-१
अस्मिन् (१०-३१) श्लोके अनुष्टुभ्-छन्दः
सर्गाणामादिरन्तश्च (८ अक्षराणि) "दिरन्त(श्च)" एतेषां मात्राः १-२-२
मध्यं चैवाहमर्जुन (८ अक्षराणि) "हमर्जु" एतेषां मात्राः १-२-१
अध्यात्मविद्या विद्यानां (८ अक्षराणि) "द्या विद्या" एतेषां मात्राः २-२-२
वादः प्रवदतामहम् (८ अक्षराणि) "दताम" एतेषां मात्राः १-२-१
तृतीये पादे अपवादः अन्यथा अस्मिन् (१०-३२) श्लोके अनुष्टुभ्-छन्दः

स्वाध्यायाः **Notes of self-study**

**(१) The pattern of pairs of words in षष्ठी-बहुवचनम् and प्रथमैक/द्वितीयैकवचनम् continues here. The running total so far is (8+15+15+7 = 45).**

**(२) The mentions** पवनः पवतामस्मि **and** स्रोतसामस्मि जाह्नवी **are about flowing fluids. Water streams are well-known. So** स्रोतसाम् **is understandable. But what about** पवताम् **? There is interesting information in** शब्दकल्पद्रुमः सप्त पवनाधिपा यथा ज्योतिस्तत्त्वे - आवहः प्रवहश्चैव सम्बहो निवहस्तथा । उद्वहो विवहो वायुः सप्त वाताः प्रकीर्त्तिताः ॥

**(३) Whereas meaning of** पवनः **is wind, the word** पवताम् **is** पवत् वि. अत्र पुं./नपुं. **6'3 where** पवत् **is** पू-धातोः शतृ-वि. पवत् / पू पूङ् पवने **(to purify, to cleanse). So** पवनः **is not every other wind, but the purifying wind. Hanuman is** पवनसुतः**, maybe, in that sense only. The phrase "purifying wind" raises a host of thoughts. There are businesses with proclaimed activities of "purifying wind". Among Puja-rituals there is** कर्पूरम् **and** धूपम्**, which give "purifying wind", pleasantly also. One is left wonder-struck when realizing how the traditions have been set so scientifically.**

**(४) Yet when the situation demands annihilation of the evil forces** रामः शस्त्रभृतामहम्.

**(५)** अहम् सर्गाणाम् आदिः अन्तः च मध्यम् च एव **in (१०-३२) brings to mind** अहमादिश्च मध्यं च भूतानामन्त एव च **in (१०-२०). We can take** सर्गाः **to be synonymous with** भूतानि.

शुभमस्तु

=========

## गीताभ्यासे १०-३३ अक्षराणामकारोऽस्मि + १०-३४ मृत्युः सर्वहरश्चाहम्

==================

अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च ।

पदच्छेदैः - अक्षराणाम् अकारः अस्मि द्वन्द्वः सामासिकस्य च ।

अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ॥ १०-३३॥

पदच्छेदैः - अहम् एव अक्षयः कालः धाता अहम् विश्वतोमुखः ॥

मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम् ।

पदच्छेदैः - मृत्युः सर्वहरः च अहम् उद्भवः च भविष्यताम् ।

कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥ १०-३४॥

पदच्छेदैः - कीर्तिः श्रीः वाक् च नारीणाम् स्मृतिः मेधा धृतिः क्षमा ॥

वाक्यांशशः विश्लेषणम्

| अनुक्र. | उद्देश्यविभागः | विधेयविभागः | | | | | |
|---|---|---|---|---|---|---|---|
| | कर्तृपदीयाः | कर्मपदीयाः | अन्ये सुबन्ताः | विधेयाः | अव्ययानि | कृदन्ताः | तिङन्ताः |
| 1 | | | अक्षराणाम् | अकारः | | | अस्मि |
| 2 | | | सामासिकस्य | द्वन्द्वः | च | | |
| 3 | अहम् एव | | | अक्षयः कालः | | | |
| 4 | अहम् | | | विश्वतोमुखः धाता | | | |
| 5 | अहम् | | | सर्वहरः मृत्युः | च | | |

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| **6** | | | भविष्यताम् | उद्भवः | च | | | |
| **7** | | | नारीणाम् | कीर्तिः<br>श्रीः वाक्<br>स्मृतिः<br>मेधा<br>धृतिः<br>क्षमा च | | | | |

## अन्वयशः शब्दाभ्यासाः

**अहम् अक्षराणाम् अकारः अस्मि**

1. **अहम् - अस्मद् सर्व. 1'1**
2. **अक्षराणाम् - अक्षर वि. अत्र नपुं. 6'3** / अक्षर ***a.*** [न क्षरतीति; क्षर् चलने अच्-न. त.] **1 Imperishable, indestructible, undecaying, epithet of the Supreme as well as the Individual soul;** द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते **Bg.15.16.** यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः **Bg.15.18; the unconcerned (Spirit);** अक्षरं ब्रह्म परमभ् **Bg.8.3. -2 Fixed, firm, unalterable. -रम्** [अश्-सरः **Uṇ.3.70,** अशेः सरः; अश्नुते व्याप्नोति वेदादिशास्त्राणि.] **1 (*a*) A letter of the alphabet;** अक्षराणामकारोऽस्मि **Bg.10.33; (*b*) a syllable;** एकाक्षरं परं ब्रह्म **Ms.2.83 the monosyllable;** गिरामस्म्येकमक्षरम् **Bg.10.25, (sacred syllable). Hence (*c*) a word or words, speech collectively;** अक्षंर वर्णनिर्माणं वर्णमप्यक्षरं विदुः । अक्षरं न क्षरं विद्यादश्नोतेर्वा सरोऽक्षरम् ॥ **-2 A document (letter &c.), sacred writing; writing in general (in pl.);** तत्र भुक्तिः प्रमाणं स्यान्न साक्षी नाक्षराणि च **Pt.3.93;**

तत्रभवत्या अक्षराणि विसृष्टानि स्युः **V.2. -3 The highest deity or Godhead, the indestructible spirit, Brahman** (परमब्रह्मन्, मूलकारणम्); अक्षरं ब्रह्म परमम् **Bg.8.3;** कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् **3.15;** यथा सतः पुरुषात्केशलोमानि तथाक्षरात्संभवतीह विश्वम् **Chān. Up.**

3. अकारः - अकार पुं. **1'1** / अकार ***a.*** [करोतीति कारः कृ-घञ् अण् वा न. त.] **Not doing or acting, void of action** (क्रियारहित). -रः **The letter अ**; अक्षराणामकारोऽस्मि **Bg.10.33.**

सामासिकस्य च द्वन्द्वः

4. सामासिकस्य - सामासिक वि. अत्र नपुं. **6'1** / सामासिक ***a.*** (-की ***f.***) **1 Comprehensive, comprehending the whole, collective. -2 Condensed, concise, brief;** एष सामासिको नयः **Ms.7.180. -3 Relating to a compound word. -4 Compounded, composite.** -कनि **The whole class of compounds;** द्वन्द्वः सामासिकस्य च **Bg. 10.33.**

5. द्वन्द्वः - द्वन्द्व पुं. **1'1** / द्वन्द्वम् **dvandvam** [द्वौ द्वौ सहाभिव्यक्तौ; **cf. P.VIII.1.15. Sk.] 1 pair, couple. -2 A couple of animals (including even men) of different sexes, *i. e.* male and female;** द्वन्द्वानि भावं क्रियया बिवव्रुः **Ku.3.35; Me.45;** न चेदिदं द्वन्द्वमयोजयिष्यत् **Ku.7.66; R.1.40; Ś.2.15;7.27;** अल्पं तुल्य- शीलानि द्वन्द्वानि सृज्यन्ते **Pratimā 1. -3 A couple of opposite conditions or qualities, (such as** सुख **and** दुःख; शीत **and** उष्ण); बलवती हि द्वन्द्वानां प्रवृत्तिः **K.135;** द्वन्द्वैरयोजयच्चेमाः सुखदुःखादिभिः प्रजाः **Ms. 1.26;6.81;** सर्वर्तुनिर्वृतिकरे निवसन्नुपैति न द्वन्द्वदुःखमिह किंचिदकिंचनोऽपि **Śi.4.64. -4 A strife, contention, quarrel, dispute, fight. -5 A duel;**

**Rām.6.43.15. -6 Doubt, uncertainty. -7 A fortress, stronghold. -8 A secret. -9 A secret, or lonely place;** द्वन्द्वे ह्येतत् प्रवक्तव्यं हितं वै यद्यवेक्षसे **Rām.7.103.11.** -न्द्वः **1 (In gram.) One of the four principal kinds of compounds, in which two or more words are joined together which, if not compounded, would stand in the same case and be connected by the copulative conjunction `and';** चार्थे द्वन्द्वः **P.II.2.29;** द्वन्द्वः सामासिकस्य च **Bg.10.33;** उभयपदप्रधानो द्वन्द्वः **Kāśikā 38.**

अहम् एव अक्षयः कालः

6. अक्षयः - अक्षय वि. अत्र पुं. **1'1** / अक्षय ***a.*** [नास्ति क्षयो यस्य] **1 Undecaying, exempt from decay, imperishable, undying, unfailing, inexhaustible**
7. कालः - काल पुं. **1'1** / कालः **Time in general**

अहम् विश्वतोमुखः धाता

8. विश्वतोमुखः - विश्वतोमुख वि. पुं. **1'1** / विश्वतः मुखं यस्य सः विश्वतोमुखः /
    a. विश्वतः - विश्व सर्व. अत्र नपुं. **5'1** / विश्व ***pron. a.*** [विश्-व **Uṇ.1.151] 1 All, whole, entire, universal;** स सर्वनामा स च विश्वरूपः **Bhāg.6.4.28. -2 Every, every one. -3 All-pervading, omnipresent. *-m. pl.* N. of a particular group of deities, ten in number and supposed to be sons of** विश्वा**; their names are:-** वसुः सत्यः क्रतुर्दक्षः कालः कामो धृतिः कुरुः । पुरूरवा माद्रवश्च विश्वेदेवाः प्रकीर्तिताः ॥ देवाः साध्यास्तथा विश्वे तथैव च महर्षयः **Mb. 3.261.6; Bg.11.22.** -श्वम् **1 The universe,**

**the (whole) world;** इदं विश्वं पाल्यम् **U.3.30;** विश्वस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः **Bv.1.13. -2 Dry ginger. -3 N. of Viṣṇu.** -श्वः **1 The soul; Bhāg.7.15.54; A. Rām.7.5.49. 50; the intellectual faculty.** / (शब्दकल्पद्रुमे) विश्वतः, [स्] व्य, (विश्व + तसिल् ।) सर्व्वतः । इत्यमरटीका ॥

b. मुखम् - मुख नपुं. **1'1 /** मुखम् **mukham** [खन् अच् डित् धातोः पूर्वं मुट् च **cf. Uṇ.5.20] 1 The mouth (fig. also);** प्रजासृजा यतः खातं तस्मादाहुर्मुखं बुधाः; ब्राह्मणोऽस्य मुखमासीत् **Ṛv.10.90.12;** सभ्रूभङ्गं मुखमिव **Me.24;** त्वं मम मुखं भव **V.1 'be my mouth or spokesman'. -2 The face, countenance;** परिवृत्तार्धमुखी मयाद्य दृष्टा **V.1.17;** नियमक्षाममुखी धृतैकवेणिः **Ś.7.21; so** चन्द्रमुखी, मुखचन्द्रः **&c;** ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु च । गलो गलादि सकलं सप्ताङ्गं मुखमुच्यते ॥ **-3 The snout or muzzle (of any animal). -4 The front, van, forepart; head, top;** (लोचने) हरति मे हरिवाहनदिङ्मुखम् **V.3.6. -5 The tip, point, barb (of an arrow), head;** पुरारि- मप्राप्तमुखः शिलीमुखः **Ku.5.54; R.3.57. -6 The edge or sharp point (of any instrument). -7 A teat, nipple;** मध्ये यथा श्याममुखस्य तस्य मृणालसूत्रान्तरमप्य- लभ्यम् **Ku.1.40; R.3.8. -8 The beak or bill of a bird. -9 A direction, quarter; as in** अन्तर्मुख. **-10 Opening, entrance, mouth;** नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः **Ś.1.14;** नदीमुखेनेव समुद्रमाविशत् **R.3.28; Ku.1.8. -11 An entrance to a**

**house, a door, passage. -12 Beginning, commencement;** सखीजनोद्वीक्षणकौमुदीमुखम् **R.3.1;** दिनमुखानि रविर्हिमनिग्रहैर्विमलयन् मलयं नगमत्यजत् **9.25;5.76; Ghaṭ.2. -13 Introduction. -14 The chief, the principal or prominent (at the end of comp. in this sense);** बन्धोन्मुक्त्यै खलु मखमुखान् कुर्वते कर्मपाशान् **Bv.4.21; so** इन्द्रमुखा देवाः **&c.**

**c.** विश्वतोमुखः

**9.** धाता **-** धातृ वि. अत्र पुं. **1'1 /** धा-धातोः तृच्-वि. **/** धातृ ***m.*** **[**धा-तृच्**] 1 A maker, creator, originator, author. -2 A bearer, preserver, supporter. -3 An epithet of Brahmā, the creator of the world;** मन्ये दुर्जनचित्तवृत्तिहरणे धातापि भग्नोद्यमः **H.2.124; R.13.6; Si.1.13; Ku.7.44; Ki.12.33;** सूर्याचन्द्रमसौ धाता यथापूर्ववमकल्पयत् **| Mahānārāyṇa Up. -4 An epithet of Viṣṇu; Mb.12.15.18. -5 The soul. -6 N. for the seven sages (**सप्तर्षि**) being the first creation of Brahmā cf.** पुरातनाः पुराविद्भिर्धातार इति कीर्तिताः **Ku.6.9. -7 A married woman's paramour, adulterer. -8 One of the forty-nine winds. -9 An arranger. -10 One who nourishes.**

अहम् सर्वहरः मृत्युः च

**10.** सर्वहरः **-** सर्वहर वि. अत्र पुं. **1'1 /** सर्वान् हरति इति सर्वहरः अथवा सर्वं हरतीति सर्वहरः

**11.** मृत्युः **-** मृत्यु **death** पुं. **1'1**

**12.** भविष्यताम् उद्भवः च

13. भविष्यताम् - भविष्यत् वि. अत्र पुं./नपुं. 6'3 / भविष्यत् *a.* (-ती or -न्ती *f.*) **About to be, become or come to pass, future. *-n.* The future time.**

14. उद्भवः - उद्भव पुं. 1'1 / उद्भवः **udbhavaḥ 1 Production, creation, birth, generation (lit. and fig.); इति हेतुस्तदुद्भवे K. P.1; Y.3.80; the place or object of origin; मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम् Bg.10.34**

नारीणाम् कीर्तिः श्रीः वाक् स्मृतिः मेधा धृतिः क्षमा च

15. नारीणाम् - नारी स्त्री. 6'3 / नारी [नृ-नर-वा जातौ ङीष् नि°] **1 A woman; अर्थतः पुरुषो नारी या नारी सार्थतः पुमान् Mk.3.27. -2 Any female or feminine object.**

16. कीर्तिः - स्त्री. 1'1 / **fame**

17. श्रीः - स्त्री. 1'1 / **glory**

18. वाक् - स्त्री. 1'1 / **speech**

19. स्मृतिः - स्त्री. 1'1 / **memory**

20. मेधा - स्त्री. 1'1 / **intellect**

21. धृतिः - स्त्री. 1'1 / **fortitude**

22. क्षमा - स्त्री. 1'1 / **tolerance, pardon**

## अन्वयार्थः Overall Meaning

1. अहम् अक्षराणाम् अकारः अस्मि - **among letters I am the letter अ.**
2. सामासिकस्य च द्वन्द्वः - **among compoundings I am the type द्वन्द्वः**
3. अहम् एव अक्षयः कालः - **among the endless ones I am Time**
4. अहम् विश्वतोमुखः धाता - **I am the supporter with universal outlook**

5. अहम् सर्वहर: मृत्युः च - **I am Death that takes all away and takes away all**
6. भविष्यताम् उद्भव: च - **I am the genesis of everything that is to come**
7. नारीणाम् कीर्तिः श्री: वाक् स्मृति: मेधा धृतिः क्षमा च - **among feminines I am fame, glory, speech, intellect, fortitude and pardon.**

छन्दोविश्लेषणम्

अक्षराणामकारोऽस्मि (८ अक्षराणि) "मकारो" एतेषां मात्राः १-२-२
द्वन्द्वः सामासिकस्य च (८ अक्षराणि) "सिकस्य" एतेषां मात्राः १-२-१
अहमेवाक्षयः कालो (८ अक्षराणि) "क्षयः का" एतेषां मात्राः १-२-२
धाताहं विश्वतोमुखः (८ अक्षराणि) "श्वतोमु" एतेषां मात्राः १-२-१
अस्मिन् (१०-३३) श्लोके अनुष्टुभ्-छन्दः
मृत्युः सर्वहरश्चाहम् (८ अक्षराणि) "हरश्चा" एतेषां मात्राः १-२-२
उद्भवश्च भविष्यताम् (८ अक्षराणि) "भविष्य" एतेषां मात्राः १-२-१
कीर्तिः श्रीर्वाक्च नारीणां (८ अक्षराणि) "क्च नारी" एतेषां मात्राः १-२-२
स्मृतिर्मेधा धृतिः क्षमा (८ अक्षराणि) "धृतिः क्ष" एतेषां मात्राः १-२-१
अस्मिन् (१०-३४) श्लोके अनुष्टुभ्-छन्दः

स्वाध्यायाः **Notes of self-study**

**(१) The pattern of pairs of words in** षष्ठी-बहुवचनम् **and** प्रथमैक/द्वितीयैकवचनम् **continues here but only in** अक्षराणाम् अकार: **and in** भविष्यताम् उद्भव: **and in** नारीणाम् कीर्तिः **etc. Basically all seven** वाक्यांशाः **are statements of "what I am"** अहम् __ अस्मि. **The running total of** अहम् __ अस्मि **statements is 52.**

**(२) Although there is no षष्ठी बहु. in सामासिकस्य द्वन्द्वः,अक्षयः कालः, in विश्वतोमुखः धाता, in सर्वहरः मृत्युः, yet अक्षयः, विश्वतः and सर्वहरः have expanse and comprehensiveness of बहु. Even the word सामासिकस्य has inclusiveness for everything that is सामासिक.**
**(३) Note in the phrase सामासिकस्य द्वन्द्वः i.e. द्वन्द्वः is that kind of compounding, wherein the component words have equal weightage उभयपदप्रधानो द्वन्द्वः. श्रीकृष्णभगवान् seems to be suggesting that He doesn't distinguish between Him and his devotees. This is endorsement of the philosophy of non-dualism अद्वैतवादः.**
**(४) The mention अहम् एव अक्षयः कालः in (१०-३३) brings to mind कालः कलयतामहम् in (१०-३०). As such मृत्युः सर्वहरश्चाहम् in (१०-३४) also has the synonym कालः. Of course meaning of कालः has all the three shades, अक्षयः what is endless, कलयत् what is ever changing, सर्वहरः मृत्युः what denotes end of everything that is perishable. That gives an idea of how succinct every statement is.**
**(५) It comes to mind that in the statement अहम् नारीणाम् कीर्तिः श्रीः वाक् स्मृतिः मेधा धृतिः क्षमा च the word नारीणाम् is not to be understood to mean that "I am the faculties कीर्तिः श्रीः वाक् स्मृतिः मेधा धृतिः क्षमा च" as these would be in women only. The actual meaning is that I am these faculties, whosoever the person is." The Sanskrit words for these faculties are feminine. So नारीणाम् means all those faculties for which the words are feminine. This brings to mind the quotes in देवीसूक्तम् - या देवी सर्वभूतेषु —रूपेण संस्थिता**

**नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः May I quote the complete देवीसूक्तम् obtained from [https://www.drikpanchang.com/lyrics/durga-saptashati/upasamhara/tantroktam-devisuktam/durga-saptashati-tantroktam-devisuktam.html](https://www.drikpanchang.com/lyrics/durga-saptashati/upasamhara/tantroktam-devisuktam/durga-saptashati-tantroktam-devisuktam.html)**

॥ अथ तन्त्रोक्तं देवीसूक्तम् ॥

नमो देव्यै महादेव्यै शिवायै सततं नमः। नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्॥1॥
रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः। ज्योत्स्नायै चेन्दुरुपिण्यै सुखायै सततं नमः॥2॥
कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः। नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः॥3॥
दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै। ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः॥4॥
अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः। नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः॥5॥
या देवी सर्वभूतेषु विष्णुमायेति शब्दिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥6॥
या देवी सर्वभूतेषु चेतनेत्यभिधीयते। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥7॥
या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥8॥
या देवी सर्वभूतेषु निद्रारूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥9॥
या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥10॥
या देवी सर्वभूतेषुच्छायारूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥11॥
या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥12॥
या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥13॥
या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥14॥
या देवी सर्वभूतेषु जातिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥15॥
या देवी सर्वभूतेषु लज्जारूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥16॥
या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥17॥
या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥18॥
या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥19॥
या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥20॥
या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥21॥

या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥22॥
या देवी सर्वभूतेषु दयारूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥23॥
या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥24॥
या देवी सर्वभूतेषु मातृरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥25॥
या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥26॥
इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या। भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः॥27॥
चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत्। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥28॥
स्तुता सुरैः पूर्वमभीष्टसंश्रयात्तथासुरेन्द्रेण दिनेषु सेविता।
करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहन्तु चापदः॥29॥
या साम्प्रतं चोद्धतदैत्यतापितैरस्माभिरीशाच सुरैर्नमस्यते।
या च स्मृता तत्क्षणमेव हन्ति नः सर्वापदो भक्तिविनम्रमूर्तिभिः॥30॥
॥ इति तन्त्रोक्तं देवीसूक्तम् समाप्तं ॥

**(९) This देवीसूक्तम् makes such a good prayer that all these faculties be bestowed upon us.**

शुभमस्तु

==========

# गीताभ्यासे १०-३५ बृहत्साम तथा साम्नाम् + १०-३६ द्यूतं छलयतामस्मि

==================

बृहत्साम तथा साम्नां गायत्री छन्दसामहम् ।
पदच्छेदैः - बृहत् साम तथा साम्नाम् गायत्री छन्दसाम् अहम् ।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ॥ १०-३५॥
पदच्छेदैः - मासानाम् मार्गशीर्षः अहम् ऋतूनाम् कुसुमाकरः ॥ १०-३५॥
द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् ।
पदच्छेदैः - द्यूतम् छलयताम् अस्मि तेजः तेजस्विनाम् अहम् ।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम् ॥ १०-३६॥
पदच्छेदैः - जयः अस्मि व्यवसायः अस्मि सत्त्वम् सत्त्ववताम् अहम् ॥ १०-३६॥

## वाक्यांशशः विश्लेषणम्

| अनुक्र. | उद्देश्यविभागः | विधेयविभागः | | | | | |
|---|---|---|---|---|---|---|---|
| | कर्तृपदीयाः | कर्मपदीयाः | अन्ये सुबन्ताः | विधेयाः | अव्ययानि | कृदन्ताः | तिङन्ताः |
| 1 | | | साम्नाम् | बृहत् साम | तथा | | |
| 2 | अहम् | | छन्दसाम् | गायत्री | | | |
| 3 | अहम् | | मासानाम् | मार्गशीर्षः | | | |
| 4 | | | ऋतूनाम् | कुसुमाकरः | | | |
| 5 | | | छलयताम् | द्यूतम् | | | अस्मि |
| 6 | अहम् | | तेजस्विनाम् | तेजः | | | |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| **7** | | | | जयः | | | अस्मि |
| **8** | | | | व्यवसायः | | | अस्मि |
| **9** | अहम् | | सत्त्ववताम् | सत्त्वम् | | | |

## अन्वयशः शब्दाभ्यासाः

तथा साम्नाम् बृहत् साम

1. तथा - अव्ययम् **also**
2. साम्नाम् - सामन् वि. तथा नपुं. **6'3** / सामन् ***n.*** [सो-मनिन् **Uṇ.4.152] 1 Appeasing, calming, comforting, soothing. -2 Cenciliation, pacific measures, negotiation, (the first of the four *upāyas* or expedients to be used by a king against an enemy);** सामदण्डौ प्रशंसन्ति नित्यं राष्ट्राभिवृद्धये **Ms.7.109. -3 Conciliatory or mild means; pacific or conciliatory conduct, gentle words;** यो दुर्बलो ह्यण्वपि याच्यमानो बलीयसा यच्छति नैव साम्ना **Pt.4.26,48. -4 Mildness, gentleness. -5 A metrical hymn or song of praise;** सप्तसामोपगीतं त्वाम् **R.10.21;** ब्रहत्साम तथा साम्नां गायत्री छन्दसामहम् **Bg.10.35. -6 A verse or text of the Sāmaveda;** सस्तोभस्वरकालाभ्यासविकारायां हङ्कारप्रणवप्रस्तावोद्गीथप्रतिहारोपद्रवनिधनवत्यामृचि गीतौ सामशब्दोऽभियुक्तैरुपचर्यते **ŚB. on MS.7.2.1;** स्तोभादिविशिष्टा ऋक् साम **ibid. -7 The Sāmaveda itself (said to have been produced from the sun; cf. Ms.1.23). -8 Voice, sound;** स्वरः सामशब्देन लोकऽभिधीयते । सुसामा देवदत्त इति सुस्वरो देवदत्त इति । स्वरो घोषो नाद इति समानार्थाः । स सामशब्देनोच्यते । **ŚB. on MS.7.2.7**

**3. बृहत् - वि. अत्र नपुं. 1’1 / बृहत्** ***a.*** **(-ती** ***f.*****) [बृह्-अति] 1 Large, great, big, bulky; वितरति बृहदश्मा पर्वतः प्रीतिमक्ष्णोः Māl.9.5. -2 Wide, broad, extensive, far-extended; दिलीपसूनोः स बृहद्भुजान्तरम् R.3.54. -3 Vast, ample, abundant. -4 Strong, powerful. -5 Long, tall**

**4. साम - सामन् सामन् वि. तथा नपुं. 1’1 /**

अहम् छन्दसाम् गायत्री

**5. अहम् - अस्मद् सर्व. 1’1**

**6. छन्दसाम् - छन्दस् नपुं. 6’3 / छन्दस्** ***n.*** **[छन्दयति असुन्] 1 Wish, desire, fancy, will, pleasure; (गृह्णीयात्) मूर्खं छन्दोऽनुवृत्तेन याथातथ्येन पण्डितम् Chāṇ.33. -2 Free will, free or wilful conduct. -3 Meaning, intention. -4 Fraud, trick, deceit. -5 The Vedas, the sacred text of the Vedic hymns; स च कुल- पतिराद्यश्छन्दसां यः प्रयोक्ता U.3.48; बहुलं छन्दसि frequently used by Pāṇini; प्रणवश्छन्दसामिव R.1.11; Y.1.143; Ms.4.95. -6 A metre; ऋक्छन्दसा आशास्ते Ś.4; गायत्री छन्दसामहम् Bg.10.35;13.4. -7 Metrical science, prosody; (regarded as one of the six Vedāṅgas or auxiliaries to the Vedas, the other five being शिक्षा, कल्प, व्याकरण, निरुक्त and ज्योतिष).**

**7. गायत्री - वि. प्रायः स्त्री. 1’1 / गायत्री 1 A Vedic metre of 24 syllables; गायत्री छन्दसामहम् Bg.10.35. -2 N. of a very sacred verse repeated by every Brāhmaṇa at his Sandhyā (morning and evening devotions) and on other occasions also. Great sins even are said to be expiated by a pious repetition of this verse, which is as follows :--**

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्
**Rv.3.62.10.**

अहम् मासानाम् मार्गशीर्ष**:**

8. मासानाम् **- मास** पुं**. 6'3 /** मासः / मासम् **[**मा एव अण्**] 1 A month, (it may be** चान्द्र**,** सौर**,** सावन**,** नाक्षत्र **or** बार्हस्पत्य**)**
9. मार्गशीर्ष**: -** मार्गशीर्ष पुं**. 1'1 /** मार्गशिरः **mārgaśiram,** मार्गशिरस् **mārgaśiras *m.*,** मार्गशीर्षः **N. of the ninth month of the Hindu year (corresponding to November-December) in which the full moon is in the constellation** मृगशिरस्

ऋतूनाम् कुसुमाकरः

10. ऋतूनाम् **-** ऋतु पुं**. 6'3 /** ऋतु **[**ऋ-तु-किच्च **Uṇ1.71] 1 A season, period of the year, commonly reckoned to be six;** शिशिरश्च वसन्तश्च ग्रीष्मो वर्षाः शरद्धिमः**; sometimes only five;** शिशिर **and** हिम **or** हेमन्त **being counted together; cf.** पञ्चर्तवो हेमन्तशिशिरयोः समासेन **Ait. Br.** वसन्तश्चैत्रवैशाखौ ज्येष्ठाषाढौ च ग्रीष्मकौ । वर्षा श्रावणभाद्राभ्यां शरदश्विनकार्तिकौ ॥ मार्गपौषौ च हेमन्तः शिशिरो माघफाल्गुनौ ॥ गोरक्षसंहिता
11. कुसुमाकरः **-** कुसुमाकर वि. अत्र पुं**. 1'1 /** कुसुमानाम् आकरः यस्मिन् सः कुसुमाकरः **(**बहुव्रीहिः**) /**
    a. कुसुमानाम् **-** कुसुम नपुं**. 6'3 /** कुसुमम् **A flower;** उदेति पूर्वं कुसुमं ततः फलम् **Ś.7.30**
    b. आकरः **- [by** पुंसि संज्ञायां घः प्रायेण **P.III.3.118** आकुर्व- न्त्यस्मिन्**; Kāśi. 1 A mine;** मणिराकरोद्भवः **R.3.18;** आकरे पद्मरागाणां जन्म काचमणेः कुतः **H. Pr.38; Ms.7.62;** आकरे- ष्वधिकारिता **Y.3.242; (fig.) a mine or**

rich source of anything (उत्पत्तिस्थानम्); मासो नु पुष्पाकरः V.1.10; अशेष- गुणाकरम् Bh.2.92; सौभाग्यपण्याकरः Mk.8.38; आकरः सर्व- शास्त्राणाम् Mu.7.7. -2 A collection, group; पद्माकरं दिनकरो विकचीकरोति Bh.2.73; कमलाकर Ku.2.29; स्नेहाकराणि Māl.9.47. -3 Best, excellent.

छलयताम् द्यूतम् अस्मि

**12.** छलयताम् - छलयत् वि. अत्र नपुं. **6'3** / छद्-धातोः शतृ-वि. छलयत् /

**13.** द्यूतम् - द्यूत नपुं. **1'1** / द्यूतः, द्यूतम् [दिव्-भावे-क्त-ऊठ् अर्धर्चा°] **1 Play, gambling, playing with dice;** द्यूतं हि नाम पुरुषस्यासिंहासनं राज्यम् **Mk.2;** द्रव्यं लब्धं द्यूतेनैव दारा मित्रं द्यूतेनैव । दत्तं भुक्तं द्यूतेनैव सर्वं नष्टं द्यूतेनैव **2.7;** अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुज्यते **Ms.9.223. -2 (fig.) A battle, fight**

**14.** अस्मि - अस्-धातोः लटि उ.पु. एक. / अस् **2** प.

अहम् तेजस्विनाम् तेजः

**15.** तेजस्विनाम् - तेजस्विन् वि. अत्र पुं./नपुं. **6'3** / तेजस्विन् **tejasvin *a.* (-**नी ***f.***) 1 Brilliant, bright. -2 Powerful, heroic, strong;** न तेजस्तेजस्वी प्रसृतमपरेषां विषहते **U.6.14; Ki.16.16. -3 Dignified, noble. -4 Famous, illustrious. -5 Violent; Bṛi. S.101.2. -6 Haughty. -7 Lawful. /** तेजस्वी, [न] त्रि, (तेजोऽस्त्यस्येति । विनिः ।) तेजोयुक्तः ।

**16.** तेजः - तेजस् नपुं. **1'1** / तेजस् ***n.*** [तिज्-भावे करुणादै असुन्] **1 Sharpness. -2 The sharp edge (of a knife &c.). -3 The point or top of a flame. -4 Heat, glow. glare. -5 Lustre, light, brilliance, splendour;** दिनान्ते निहितं तेजः **R.4.1;**

तेजश्चास्मि विभावसौ **Bg.7.9,10. -6 Heat or light considered as the third of the five elements of creation (the other four being** पृथिवी, अप्, वायु **and** आकाश**).**

जयः अस्मि

**17.** जयः - जय पुं. **1'1** / जयः [जि भावे अच्] **1 Conquest, triumph, victory, success, winning (in battle, game or a law-suit);** सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः **Mb.10.115. -2 Restraint, curbing, conquest as in** इन्द्रियजय. **-3 N. of the sun. -4 N. of Jayanta, son of Indra;** जगृहे च धनुधीता मुसलं तु जयस्तथा **Mb.1.227.34. -5 N. of Yudhiṣṭhira, the first Pāndava prince. -6 N. of an attendant of Visnu. -7 An epithet of Arjuna;** संस्मरन् भ्रातरं जयम् **Mb.3.158.2. -8 N. of the Mahābhārata;** देवीं सरस्वतीं चैव ततो जयमुदीरयेत् **Mb.1.1.1; Bhāg.1.2.4; -9 The heroic sentiment;** सहजेतरौ जयशमौ दधती **Ki.6.22. -10 Words of victory**

व्यवसायः अस्मि

**18.** व्यवसायः - व्यवसाय पुं. **1'1** / व्यवसो (वि+अव+सो) इति धातुः / व्यवसायः **1 Effort, exertion, energy, industry, perseverance;** करोतु नाम नीतिज्ञो व्यवसायमितस्ततः **H.2.14. -2 Resolve, resolution, determination;** मन्दीचकार मरण- व्यवसायबुद्धिम् **Ku.4.45 'the thought of resolving to die';** व्यवसायात्मिका बुद्धिः **Bg.2.41;** व्यवसायोऽस्मि **10.36. -3 An act, action, performance;** व्यवसायः प्रतिपत्तिनिष्ठुरः **R.8.65. -4 (*a*) Business, employment, trade. (*b*) Following a particular profession or trade. -5 Conduct, behaviour. -6 Device, stratagem, artifice /**

शब्दकल्पद्रुमे ⇒ व्यवसायः, पुं, (वि + अव + सो + घञ् ।) उपजीविका / करोति नाम नीतिज्ञो व्यवसायमितस्ततः । फलं पुनस्तदेव स्याद्यद्विधेर्मनसि स्थितम् ॥ इति हितोपदेशे

अहम् सत्त्ववताम् सत्त्वम्

**19. सत्त्ववताम् - सत्त्ववत् वि. अत्र पुं./नपुं. 6'3 / सत्त्व+वत् = सत्त्ववत् / one having (सत्त्व: or) सत्त्वम्**

**20. सत्त्वम् - सत्त्व नपुं. 1'1 / सत्त्वम् [सतो भावः] (Said to be *m.* also in the first ten senses) 1 Being, existence, entity. -2 Nature, essence. -3 Natural character, inborn disposition; अच्योष्ट सत्त्वान्नृपतिश्च्युताशः Bk.3.20. -4 Life, spirit, breath, vitality, principle of vitality; उद्गतानीव सत्त्वानि बभूवुरमनस्विनाम् Rām.2.48.2; चित्रे निवेश्य परिकल्पित- सत्त्वयोगा Ś.2.10. -5 Consciousness, mind, sense; वाक्च सत्वं च गोविन्द बुद्धौ संवेशितानि ते Mb.12.46.4; Bg.16.1; Bhāg.7.15.41. -6 An embryo. -7 Substance, thing, wealth. -8 An elementary substance such as earth, air, fire &c. -9 (also *m.*) A living or sentient being, animal, beast; वन्यान् विनेष्यन्निव दुष्टसत्त्वान् R.2.8;15.15; किं नोऽपत्यनिर्विशेषाणि सत्वानि विप्रकरोषि Ś7; Māl.9; यश्चासूनपि संत्यजेत् करुणया सत्त्वार्थमभ्युद्यतः Nāg.2.10. -10 An evil spirit, a demon, ghost; अद्य नूनं दशरथः सत्त्वमाविश्य भाषते Rām.2.33.10. -11 Goodness, virtue, excellence. -12 Truth, reality, certainty. -13 Strength, energy, courage, vigour, power, inherent power, the stuff of which a person is made; निजमेव सत्त्वमुपकारि साम् Ki.18. 14; Mb.12.313.17; क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे Subhāṣ.; R.5.31;**

**Mu.3.22. -14 Wisdom, good sense. -15 The quality of goodness or purity regarded as the highest of the three Guṇas q. v.; (it is said to predominate most in gods and heavenly beings). -16 A natural property or quality, characteristic. -17 A noun, substantive. -18 Intellect** (बुद्धि); अघ्राणमवितर्कं च सत्त्वं प्रविशते परम् **Mb.12.204.18. -19 The subtle body of individual soul** (लिङ्गशरीर); गृहाणीव हि मर्त्यानामाहुर्देहानि पण्डिताः । कालेन विनियुज्यन्ते सत्त्वमेकं तु शाश्वतम् ॥ **Mb.11.3.8**

## अन्वयार्थः Overall Meaning

1. तथा (अहम्) साम्नाम् बृहत् साम (अस्मि) - **Also, among Psalms (hymns) to be sung, I am the great Psalm (hymn).**
2. अहम् छन्दसाम् गायत्री - **among poetic meters I am** गायत्री.
3. अहम् मासानाम् मार्गशीर्ष: - **among months I am that month when on the full moon day, one can sight the constellation** मृगशीर्ष.
4. ऋतूनाम् कुसुमाकरः - **among seasons I am that season when the flowers ar in full blossom.**
5. छलयताम् द्यूतम् अस्मि - **among games, that would pester, I am the one played with dice.**
6. अहम् तेजस्विनाम् तेज: - **I am the brilliance of the brilliant.**
7. जय: अस्मि - **I am the victory**
8. व्यवसाय: अस्मि - **I am professionalism**
9. अहम् सत्त्ववताम् सत्त्वम् - **I am the chastity of the chaste.**

## छन्दोविश्लेषणम्

बृहत्साम तथा साम्नां (८ अक्षराणि) “तथा सा” एतेषां मात्राः १-२-२
गायत्री छन्दसामहम् (८ अक्षराणि) “न्दसाम” एतेषां मात्राः १-२-१
मासानां मार्गशीर्षोऽहम् (८ अक्षराणि) “र्गशीर्षो” एतेषां मात्राः १-२-२
ऋतूनां कुसुमाकरः (८ अक्षराणि) “सुमाक” एतेषां मात्राः १-२-१
अस्मिन् (१०-३५) श्लोके अनुष्टुभ्-छन्दः

द्यूतं छलयतामस्मि (८ अक्षराणि) “यताम(स्मि)” एतेषां मात्राः १-२-२
तेजस्तेजस्विनामहम् (८ अक्षराणि) “स्विनाम” एतेषां मात्राः १-२-१
जयोऽस्मि व्यवसायोऽस्मि (८ अक्षराणि) “वसायो” एतेषां मात्राः १-२-२
सत्त्वं सत्त्ववतामहम् (८ अक्षराणि) “वताम” एतेषां मात्राः १-२-१
अस्मिन् (१०-३६) श्लोके अनुष्टुभ्-छन्दः

## स्वाध्यायाः Notes of self-study

**(१) Except for जय: अस्मि and व्यवसाय: अस्मि the other seven are pairs of षष्ठी-बहुवचनम् and प्रथमैकवचनम्. Yet all the nine statements are basically अहम् ____ अस्मि. So, the running total of these statements is now 61.**

**(२) I wonder whether बृहत्साम तथा साम्नाम् is already quoted as वेदानां सामवेदोऽस्मि (१०-२२). Of course there is the difference between साम्नाम् and वेदानाम्. But does बृहत्साम suggest सामवेद: only or any महाकाव्यम् ? As such गीता is part of महाभारतम् which is a महाकाव्यम्, which had the original title as जय:. Here श्रीकृष्णभगवान् does declare जयोऽस्मि, whereby the word जय: can be understood by all shades of its meaning.**

**(३) I noted सत्त्व+वत् = सत्त्ववत्. But सत्त्व itself is सत्+त्व. Hence सत्त्वम् [सतो भावः]. This brings to mind**

नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥ २-१६॥

**As such the word सत् has three meanings (i) सत् as शतृ-वि. of धातुः अस् means what exists (ii) सत् means सत्यम् what is true, because what exists has truth by its very existence (iii) सत् means good, gentle as in सज्जनः.**
**If we may use the pronoun 'it' for every सत् for everything that exists, then every 'it' has its own सत्त्वम् 'it'-ness. And that सत्त्ववताम् सत्त्वम् 'it'-ness of every 'it' अहम् अस्मि is Me ! Isn't this same as मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् (९-१०) ? OR taking the meaning "सत् means good, gentle", सत्त्ववताम् सत्त्वम् the goodness of all good things, goodness of all good people अहम् अस्मि is Me !**
**(४) It is ironical that श्रीकृष्णभगवान् should be telling अर्जुनः "द्यूतं छलयतामस्मि". अर्जुनः and all पाण्डवाः have already experienced how tormenting छलयत् does द्यूतम् become. The advocacy is that one should not indulge in games of luck, even as a pastime. Why not rather focus on what is professional, what is professionally doable, what is व्यवसायः, what is तेजः brilliant and benevolent ?**

शुभमस्तु

==========

## गीताभ्यासे १०-३७ वृष्णीनां वासुदेवोऽस्मि + १०-३८ दण्डो दमयतामस्मि

==================

वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः ।

पदच्छेदैः - वृष्णीनाम् वासुदेवः अस्मि पाण्डवानाम् धनञ्जयः ।

मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥ १०-३७॥

पदच्छेदैः - मुनीनाम् अपि अहम् व्यासः कवीनाम् उशना कविः ॥

दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम् ।

पदच्छेदैः - दण्डः दमयताम् अस्मि नीतिः अस्मि जिगीषताम् ।

मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥ १०-३८॥

पदच्छेदैः - मौनम् च एव अस्मि गुह्यानाम् ज्ञानम् ज्ञानवताम् अहम् ॥

वाक्यांशशः विश्लेषणम्

| अनुक्र. | उद्देश्यविभागः | विधेयविभागः | | | | | |
|---|---|---|---|---|---|---|---|
| | कर्तृपदीयाः | कर्मपदीयाः | अन्ये सुबन्ताः | विधेयाः | अव्ययानि | कृदन्ताः | तिङन्ताः |
| 1 | (अहम्) | | वृष्णीनाम् | वासुदेवः | | | अस्मि |
| 2 | | | पाण्डवानाम् | धनञ्जयः | | | |
| 3 | अहम् | | मुनीनाम् | व्यासः | अपि | | |
| 4 | | | कवीनाम् | उशना कविः | | | |
| 5 | | | दमयताम् | दण्डः | | | अस्मि |
| 6 | | | जिगीषताम् | नीतिः | | | अस्मि |
| 7 | | | गुह्यानाम् | मौनम् | च एव | | अस्मि |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| **8** | अहम् | | ज्ञानवताम् | ज्ञानम् | | | |

## अन्वयशः शब्दाभ्यासाः

(अहम्) वृष्णीनाम् वासुदेवः अस्मि

**01.** (अहम्) - अस्मद् सर्व. **1'1**

**02.** वृष्णीनाम् - वृष्णि वि. अत्र पुं. **6'3** / वृष्णि वृषेः निः किच्च **Uṇ.4.50-51]** ***a.*** **1 Heretical; heterodox. -2 Angry, passionate. -3 Ved. Raining.** ***-m.*** **1 A cloud. -2 A ram. -3 A ray of light. -4 N. of an ancestor of Kriṣṇa. /**

**03.** वासुदेवः - वासुदेवः [वसुदेवस्यापत्यम् अण्] **1 Any descendant of Vasudeva. -2 Particularly, Kṛiṣṇa. -3 The sage Kapila;** वासुदेवेति यं प्राहुः कपिलं मुनिपुङ्गवम् **Mb.3.107.32** / वसुदेवः **N. of the father of Kṛiṣṇa and son of Sūra, a descendant of Yadu.** / वसु ***a.*** **Sweet. -2 Dry. -3 Ved. Wealthy, rich. -4 Ved. Good.** ***-n.*** [वस्-उन् **Uṇ.1.10] 1 Wealth, riches** / वसुः **(the** ***Vasus*** वसवः **are eight in number :-- 1** आप, **2** ध्रुव, **3** सोम, **4** धर **or** धव, **5** अनिल, **6** अनल, **7** प्रत्यूष, **and 8** प्रभास; **sometimes** अह **is substituted for** आप; धरो ध्रुवश्च सोमश्च अहश्चैवानिलोऽनलः । प्रत्यूषश्च प्रभासश्च वसवोऽष्टाविति स्मृताः) / वसून् धरतीति वसुंधरा / वसुं धरतीति वसुधा / वसोः देवः वसुदेवः /

**04.** अस्मि - अस्-धातोः लटि उ.पु. एक. / अस् **2** प. **To be**

पाण्डवानाम् धनञ्जयः

**05.** पाण्डवानाम् - पाण्डव वि. अत्र पुं. **6'3** / पाण्डवः [पाण्डोरपत्यं पुमान् ओरञ्] **'A son or descendant of** पाण्डुः**', N. of any one of the five sons of** पाण्डुः; ***i. e.*** युधिष्ठिर, भीम, अर्जुन, नकुल **and** सहदेव

**06.** धनञ्जयः **-** धनञ्जय वि. अत्र पुं. **1'1 /** धनं जयतीति धनञ्जयः **/** धनंजयः **1 N. of Arjuna (the name is thus derived in Mb.4.44.13 :--** सर्वान् जनपदान् जित्वा वित्तमादाय केवलं । मध्ये धनस्य तिष्ठामि तेनाहुर्मां धनंजयम् ॥**).**

मुनीनाम् अपि अहम् व्यासः

**07.** मुनीनाम् **-** मुनि वि. अत्र पुं. **6'3 /** मुनिः **[**मन्-इन् उच्च **Uṇ.4.122] 1 A sage, a holy man, saint, devotee, an ascetic;** मुनीनामप्यहं व्यासः **Bg.10.37;** दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । वीतरागभयक्रोधः स्थित- धीर्मुनिरुच्यते ॥ **2.56**

**08.** अपि **-** अव्ययम् **also**

**09.** व्यासः **-** व्यास पुं. **1'1 /** व्यासः **1 Distribution, separation into parts. -2 Dissolution or analysis of a compound. -3 Severalty, distinction. -4 Diffusion, extension;** तस्यैव व्यासमिच्छामि ज्ञातुं ते भगवन् यथा **Bhāg.6.4.2. -5 Width, breadth. -6 The diameter of a circle. -7 A fault in pronunciation. -8 Arrangement, compilation. -9 An arranger, a compiler;** द्वैपायनोऽस्मि व्यासानां कवीनां काव्य आत्मवान् **Bhāg.11.16.28. -10 N. of a celebrated sage. [He was the son of the sage Parāśara by Satyavatī (born before her marriage with Śantanu q. v.); but he retired to the wilderness as soon as he was born, and there led the life of a hermit, practising the most rigid austerities until he was called by his mother Satyavatī to beget sons on the widows of her son Vichitravīrya. He was thus the father of Pāṇḍu and Dhṛitarāṣṭra and also of Vidura; q. q. v. v. He was at first called 'Kṛiṣṇadvaipāyana' from**

**his dark complexion and from his having been brought forth by Satyavatī on a Dvīpa or island; but he afterwards came to be called Vyāsa or 'the *arranger,*' as he was supposed to have arranged the Vedas in their present form;** विव्यास वेदान् यस्मात् स तस्माद् व्यास इति स्मृतः **cf. also** जातः स यमुनद्वीपे द्वैपायन इति स्मृतः । व्यस्य वेदान् समस्तांश्च व्यासतामगमद्विभुः ॥ **Bm.1.214. He is believed to be the author of the great epic, the Mahābhārata, which he is said to have composed with Gaṇapati for his scribe. The eighteen Purāṇas, as also the Brahma-sūtras and several other works are also ascribed to him. He is one of the seven *chiranjeevi's* or deathless persons; cf.** चिरजीविन्**.]**

कवीनाम् उशना कविः

